प्रकाशन प्रत्येक माह की 1 तारीख

ISSN 2249-698X

# भारती

## संस्कृत–मासपत्रिका

एकस्या: प्रते: २५/–
वार्षिक-शुल्कम्
२५०/–
पञ्चवार्षिकशुल्कम्
११००/–
पञ्चदशवार्षिकशुल्कम्
३१००/–

वर्षम् 76, अङ्क: -02, मार्गशीर्ष-मास:, विक्रमाब्द: 2082, युगाब्द: 5127, दिसम्बर, 2025




रामधामनि साकेते, रामराज्यप्रचारिणी।
ध्वजारोहणसम्पत्ती, रराजीत्युच्चशेखरे।।

# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | वेदवीथिपथिकः श्रीमोतीलालशर्मा | वेदस्य सर्वविद्यानिधानत्वम् | ६ |
| ३ | पाठक-प्रतिक्रिया | महामहोपाध्यायः डॉ. बाबूलालः मीना | १० |
| ४ | पृथुवंशम् | कविसार्वभौम अभिराजराजेन्द्रमिश्रः | ११ |
| ५ | सीमन्तसिन्दूरम् | डॉ. महेशचन्द्रशर्मा गौतमः | १३ |
| ६ | भारतीपत्रिकासप्तकम् | डॉ. प्रीति आर. पुजारा | १४ |
| ७ | पहलग्रामातंकहाहाकारः | डॉ. रामनारायणः झाः | १५ |
| ८ | शीघ्रप्रतिक्रियाकूटसङ्केतः | डॉ. हर्षदेवमाधवः | १६ |
| ९ | विभिन्नशास्त्रानुगुणं वृत्तेः स्वरूपम् | अंकितशर्मा | १७ |
| १० | जगज्जननी त्रिपुरासुन्दरी | शिवराजभट्टः | २१ |
| ११ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २४ |
| १२ | पाठक-प्रतिक्रिया | डॉ. अञ्जना शर्मा | २६ |
| १३ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | २७ |
| १४ | विशेषाङ्कस्य लोकार्पणम् | सम्पादकः | ३६ |


लेखकेभ्यो निवेदनम् - कृपया स्वलेखान् 'चाणक्य Font' द्वारा टंकयित्वा अशुद्धिसंशोधनं च कृत्वा 'PDF' एवं 'Word' द्वारा प्रेषयन्तु। ग्राहकेभ्यो निवेदनम् - किसी मास का अंक दिनाङ्क 10 तक प्राप्त न हुआ हो तो कृपया Whatsapp द्वारा चलदूरभाष सं. 93520 30291, 8005813613 ( व्यवस्थापक ) पर अपने नाम, पते सहित सूचना करें।

## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

दूरभाषः 0141–2379014, मो. 9799011085

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

॥ श्रीश: ॥

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षका:
श्रीश्यामशरणदेवाचार्य:
( निम्बार्कपीठम्, सलेमाबाद: )
स्वामी रामभद्राचार्य:
( चित्रकूट: )
स्वामी अवधेशानन्दगिरि:
( हरिद्वारम् )
महन्त: गोविन्ददेवगिरि:
( पुणे )
श्रीमज्जगद्गुरुद्वाराचार्यौ अग्रपीठाधीश्वरो
मलूकपीठाधीश्वरश्च
स्वामी श्रीराजेन्द्रदासमहाराज:
( अग्रपीठम्, रेवासा )
महन्त: प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

सम्पादक:
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादक:
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादक:
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्
अध्यक्ष:
प्रोफेसर बनवारीलालगौड:

उपाध्यक्षौ
डॉ. नाथूलालसुमन:
डॉ. नन्दसिंहनरूका:

सचिव:
डॉ. सुधीरकुमारशर्मा

सहसचिव:
कृष्णकुमारशर्मा

व्यवस्थापक:
राजीवदाधीच:
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय ( शिक्षा मंत्रालय, भारत सरकार के अधीन ) के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित।

कार्यालय:
बी-15, भारतीभवनम्
न्यु कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 76 अङ्क: -02
मार्गशीर्ष-मास:
विक्रमाब्द: 2082
युगाब्द: 5127
दिसम्बर, 2025

एकस्या: प्रते: 25/-
वार्षिकशुल्कम् 250/-
पञ्चवार्षिकशुल्कम् 1100/-
आजीवनसदस्यताशुल्कम् 3100/- ( 15 वर्षाणि )

सम्पादकीयम्

# ध्वजारोहण-यज्ञेन सङ्कल्पः पूर्णतां गतः

...✍ प्रोफेसर श्रीकृष्णशर्मा

**रामो विग्रहवान् धर्मस्तं प्रणौमि सदा मुदा।**

अद्भुताभासम्पन्ने नूतनकालचक्रस्योद्गमस्वरूपे सूर्योदये सति २२ जनवरी, २०२४ दिनाङ्के तदनुसारं वि.सं. २०८० तमे वर्षे पौषमासे सिते पक्षे द्वादश्यां तिथौ चन्द्रवासरे शुभवेलायाम् अयोध्यानगर्यां पावनधरायां श्यामलवर्णात्मके बालस्वरूपे श्रीरामललाविग्रहे वैदिकमन्त्रोच्चारणैः प्राणप्रतिष्ठा समजनि।

अथाऽधुना २५ नवम्बर, २०२५ दिनाङ्के, तदनुसारं २०८२ तमे वैक्रमाब्दे 'सिद्धार्थ' नामसंवत्सरे मार्गशीर्षमासे सिते पक्षे श्रीराम-जानकी-विवाह-पञ्चम्यां तिथौ भौमवासरे उत्तराषाढनक्षत्रे पूर्वाह्ने ११.५८ वादनेऽभिजिन्मुहूर्त्तेऽस्माकं यशस्वी प्रधानमन्त्री श्री नरेन्द्र मोदी महोदयो यन्त्रविशेषं (Lever) दक्षिणतो वामभागे परिभ्राम्य २ कि.ग्रा. तोलपरिमितं कुङ्कुम-वर्ण (केसरिया Saffron) **ध्वजं** श्रीराममन्दिरस्य १६१ फीट-परिमितोच्चशिखरे समुच्छ्रायितवान् (Hoisted)। अस्मिन्नवसरे राष्ट्रीय-स्वयंसेवकसंघ-सरसंघचालकः **श्रीमोहनराव-भागवतः**, उत्तरप्रदेशस्य राज्यपाल आनन्दीबेन पटेलः, उत्तरप्रदेशमुख्यमंत्री योगी आदित्यनाथः, महन्तश्रीनृत्यगोपालदासः, स्वामी श्रीगोविन्ददेवगिरी महाराजः, श्रीचम्पतरायप्रभृतयः, वैदिकविद्वांसः, सहस्रशो भक्ता दर्शकाश्च तत्र मन्दिरप्राङ्गणे समुपातिष्ठन्त।

'केसरिया' ध्वजोपरि 'ॐ' 'सूर्यः' 'कोविदारवृक्षः' अपि समङ्कितः। 'कोविदारवृक्ष' रामराज्यस्य त्रेतायुगे तपसः, त्यागस्य मर्यादायाश्च प्रतीकमासीदिति पौराणिकं मतम्।

प्रधानमन्त्री ध्वजारोहणकाले भाव-विह्वलः सञ्जातः। सोऽब्रवीत्-५०० वर्षाणां सतत-संघर्षानन्तरं भक्तजनैः प्राणपणैः पूर्वप्रतिज्ञातस्य राम-मन्दिर-ध्वजारोहरणसङ्कल्पस्याधुना सम्पन्नता जाता। विलक्षणो दिव्यश्चायं क्षणः। सत्यस्यासत्योपरि विजयावसरोऽयम्। मर्यादापुरुषोत्तमो युञ्जानयोगी रामो न केवलं व्यक्तिरपितु धर्मस्वरूपं मूल्यम् (Value)। आंग्लदेशीयेतिहासकर्तुः श्री थॉमस बैबिंगटन **मैकालेः** चर्चां कुर्वन् अब्रवीद् यद् १९० वर्षेभ्यः प्राक् (१८३५ ई.) स भारतीयशिक्षापद्धतिं समुन्मूलनाय यावच्छक्यं प्रायतत। सफलोऽप्यभूद्। भारतीया आंग्लभाषानुरक्ता पाश्चात्यसंस्कृतिपराः सन्तो मनसाऽपि परतन्त्रा अभवन्। एतद् मानसपारतन्त्र्यं सर्वथा दूरीकर्तुम् अस्माभिः सज्जीभूतैर्भाव्यम्। भारतवर्षं विकसितराष्ट्रम् उद्घोषयितुम् अन्तःस्थस्य रामस्योज्जागरणमावश्यकम्। धर्मध्वजोऽयं विकसितभारतस्योर्जां धारयन् न्यायमार्गस्य प्रतीको भवेत्, सुशासनेन समृद्धेः पथप्रदर्शको भवन् नित्यम् उच्छ्रितः स्यादित्येव भगवन्तं श्रीरामं प्रार्थय इति।

**राष्ट्रीयस्वयंसेवकसंघप्रमुखेनोक्तम्** 'यादृशः स्वप्नो राममन्दिरनिर्माणस्य प्रकल्पित आसीत् ततोऽपि भव्यतरं निर्माणं साक्षात् पश्यामोऽतश्चेतो मोमुद्यते। आश्वसिमि यदद्य स्वर्लोके यतानां श्री-अशोक

सिंहल-महाराज-रामचन्द्रदास-परमहंस-विष्णु हरि डालमिया-महोदयानाम् आत्मानः सन्तृप्ता अभविष्यन्' इति।

ध्वजारोहणात् प्राग् विद्वद्भिः २१-२५ नवम्बर, २०२५ दिनाङ्केषु प्रवर्तमाने महायज्ञे त्रिंशद् होरा-पर्यन्तं श्रीमद्-भागवत-शिव-ब्रह्मवैवर्तपुराणानां वाल्मीकिरामायणस्य च विशिष्टमन्त्रजपाः समनुष्ठिताः। एतज्जपैः सहैव 'रामरक्षास्तोत्र'-पुरुषसूक्त-श्रीसूक्त-रुद्रपाठाश्च सम्पादिता आचार्य-मण्डलेन। **ध्वजारोहरणमन्त्र**स्वरूपमित्थम्- 'ॐ नमोऽस्तुते ध्वजाय, सकलभुवनजनहिताय, विभवसहित-विमलचरितबोधकाय मङ्गलाय ते सततम्' इति। अधुना श्रीराम-मन्दिरे श्रीरामप्रभोः श्यामलवर्णयुते विग्रहे प्राणप्रतिष्ठानन्तरं मन्दिरशिखरे धर्मध्वजारोहणानुष्ठानं सम्पन्नम्।

विशेषतो वर्धापनार्हा न्यासो, राष्ट्रसेवापरायणः प्रधानमन्त्री, उत्तरप्रदेश-राज्यसर्वकारस्तत्प्रमुखो योगी आदित्यनाथश्च। स्मर्यतेऽधुना वाल्मीकि-वचनम्-

**रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।**
**राजा सर्वस्य लोकस्य देवानामिह वासवः।।**

इति। - वा.रामायणे अरण्यकाण्डे-३७.३


**- सम्पादकः**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये
संस्कृतविभागाध्यक्षचरः,
जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य-
राजस्थान- संस्कृत-विश्वविद्यालये
व्याकरणपीठाध्यक्षचरश्च।
दूरभाषाङ्कः 8386943655



*With best compliments from :*

Regd. Office & Works : HAMIRGARH
Distt. BHILWARA-311025 (Raj.)
Tel. : 01482-286102, 03, 05 & 06
E-mail : bhilwara@kanoria.org
Website : www.ainfrastructure.com
CIN : L25191RJ1980PLC002077
GST No.: 08AABCA7493D1ZO

**Kanoria Energy**
**& Infrastructure Limited**

(Formerly Known as A Infrastructure Limited)

MANUFACTURER OF MAZZA AC PIPES KIRTI BRAND

411, IIIrd Floor, Shalimar Complex, Church Road, JAIPUR-302001 (Raj.)
Ph. : 0141-4019691, 2370566 • E-mail : jaipur@kanoria.org

पूर्वानुवृत्तम् -

# वेदस्य सर्वविद्यानिधानत्वम्

❑ वेदवीथिपथिकः श्रीमोतीलालशर्मा *

प्रभवप्रलयाधिष्ठातुस्तस्यैतस्याव्ययात्मनोऽमृता विद्या अक्षरविद्या मुक्तिसाक्षिणी, मर्त्या तु क्षरविद्या सृष्टिसाक्षिणी। शास्ता त्वन्यः सच्चिदानन्दलक्षणः पुरुषात्मा अव्ययः। तदेतत्सर्वं गुहानिहितं विद्यारहस्यमभिप्रेत्याह महर्षिः श्वेताश्वतरः -

**द्वे अक्षरे ब्रह्मपरे त्वनन्ते**
**विद्याविद्ये निहिते यत्र गूढे।**
**क्षरं त्वविद्या ह्यमृतं तु विद्या**
**विद्याविद्ये ईशते यस्तु सोऽन्यः।।**

श्वेताश्वतरोपनिषत् ५/१

मुण्डकश्रुतिरप्याह – '**शौनको ह वै महाशालोऽङ्गिरसं विधिवदुप सन्नः पप्रच्छ- 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति'? इति। तस्मै स होवाच-द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति-परा चैव, अपरा च। तत्रापरा-ऋग्वेदो, यजुर्वेदः, सामवेदोऽथर्ववेदः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्यौतिषमिति। अथ परा, यया तदक्षरमधिगम्यते**'। – मुण्डकोपनिषत् १/१/२,३,४

इदमत्रावधेयम्। श्वेताश्वतरश्रुतौ तु अक्षरभावस्य विद्यात्वं, क्षरभावस्य च अविद्यात्त्वं प्रतिपादितम्। मुण्डकोपनिषदि च क्षराक्षरयोरुभयोरेव विद्यात्वं निरूपितमित्येवं सति श्रुतिविरोध आपद्यते। तन्निराकरणार्थं विश्वोपाधिविरहिता विशुद्धा विद्या विद्या, विश्वविशिष्टा विश्वरूपा विद्या त्वविद्येत्थं सामञ्जस्यं कार्य्यम्। विश्वरूपा विद्या विज्ञानम्, विशुद्धा तु विद्या ज्ञानम्। संचरक्रमे ज्ञानमेव विज्ञानं भवति, प्रतिसञ्चरक्रमे विज्ञानमेव ज्ञानम्। सृष्टिकाले ब्रह्मैवेदं विश्वं, संहारकाले विश्वमेवेदं ब्रह्मेति 'ब्रह्मैवेदं सर्वम्' 'सर्वं खल्विदं ब्रह्म' त्यादिरूपेण सञ्चरप्रतिसञ्चरपक्षनिरूपकैः श्रौतवचनैः स्पष्टम्।

विद्यानुग्राहको ज्ञानपक्षः, अविद्यानुग्राहकः कर्म्मानुग्राहको वा विज्ञानपक्षः। न केवलं ज्ञानमेव पुरुषार्थः, नापि विज्ञानमेव। विज्ञानसहकृतं ज्ञानमेवेह लोकेऽभ्युदयजनकं सत् परलोके निःश्रेयसकरम्। विज्ञानात्मके कर्मकाण्डे-एव निष्णाता वैज्ञानिका वा कर्म्मठा वा अन्धं तमः प्रविशन्ति। ततो भूय इव ते, ये केवलं ज्ञाने एव रता ज्ञानिनः सर्वकर्म्मपरित्याग-लक्षणसंन्यासपथानुयायिनः। संग्रहे एवाभ्युदयः। तदेतत् सर्वं रहस्यं हृदि निधायैवोक्तमभियुक्तैः -

**तृष्णा लज्जा भयं दुःखं विषादो हर्ष एव च।**
**एभिर्दोषैर्विनिर्मुक्तः स जीवः शिव उच्यते ॥१॥**
**तस्माद्दोषविनाशार्थमुपायं कथयामि ते।**
**ज्ञानं केचिद्वदन्त्यत्र केवलं तन्न सिद्धये ॥२॥**
**योगहीनं कथं ज्ञानं मोक्षदं भवतीह भोः।**
**योगोऽपि ज्ञानहीनस्तु न क्षमो मोक्षकर्म्मणि ॥३॥**
**तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत् ॥४॥**

– योगशिखोपनिषत्

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय!।**
**सिद्ध्यसिद्ध्योः समो भूत्त्वा समत्त्वं योग उच्यते ॥५॥**

* मा ज्ञानसम्पदेतस्या, ऊतीला रक्षणस्थितिः। तां लाति यः समादत्ते, स मोतीलाल उच्यते।। (पं. मधुसूदन ओझाः)
– सम्पादकः

**न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।**
**न च संन्यसनादेव सिद्धिं समधिगच्छति॥६॥**
**काम्यानां कर्म्मणां न्यासं संन्यासं कवयो विदुः॥७॥**
**ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।**
**यज्ज्ञात्त्वा नेह भूयोऽन्यज् ज्ञातव्यमवशिष्यते॥८॥**

– गीता, २.४८, ३.४, १८.२, ७.२

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**
**ततो भूय इव ते तमो य उ विद्यायां रताः॥९॥**
**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्त्वा विद्ययामृतमश्नुते॥१०॥**

– ईशोपनिषत्, ९, ११

एतेन– 'सर्वकर्मपरित्यागलक्षणो विशुद्धज्ञानात्मकं संन्यास एव मुक्तये उपयुज्यते' इति कथयन्तो ज्ञानवादिनः सर्वथैव प्रत्युक्ता जगन्मिथ्यात्त्ववादरता वेदान्तिनः।

पूर्वोक्तेन सन्दर्भेणेदं साधु संसिद्धं भवति– यन्निबन्धप्रेरकैर्येयं संस्कृतविद्याभिप्रेता, सैषा वेदमूला वेदात्मिका वा विश्वविद्यैव–इति। तस्याश्चास्या विश्वविद्याया मूलं सच्चिदानन्दघनो वेदपदार्थ एव। वेद एव विद्यारूपेण विकसन् प्रतीयते। सैषा महाविश्वात्मिका महाविद्यैवागमशास्त्रे दशधा विभज्योपस्तूयत इति दशमहाविद्यारहस्ये वैशद्येन प्रतिपादितमिति विशेषजिज्ञासुभिस्तत्रैव द्रष्टव्यम्। प्रकाशितञ्चेदं दशमहाविद्यारहस्यमंशात्मना राष्ट्रभाषामाध्यमेन। तस्या एतस्या विश्वविद्याया उदरे अनेकाः खण्डविद्या निविष्टा विद्यन्ते। तासामेतासां खण्डविद्यानामनुग्राहिणी महाविद्या वेदविद्या नाम। ततश्च वेदस्य, किंवा वेदविद्यायाः सर्वविद्यानिधानत्त्वं सम्यगुपपद्यते। सैषा विद्यापदार्थमीमांसा द्वितीया संक्षेपेण प्रदर्शिता। इति–विद्यानिरुक्तिः।*

वेदे प्रतिपादिता सेयं विश्वविद्या **आधिदैविकी विद्या, आधिभौतिकी विद्या, आध्यात्मिकी विद्या, आधियाज्ञिकी विद्या, आधिनाक्षत्रिकी विद्या**–इत्येवंरूपेणानेकधा विभक्ता द्रष्टव्या। वस्तुतस्त्वासां सर्वासां खण्डविद्यानां ब्रह्म-यज्ञ-विद्ययोरेवान्तर्भावः। मूलविद्या ब्रह्मविद्या, तूलविद्या तु यज्ञविद्या। मौलिकतत्त्वनिरूपणात्मकं शास्त्रं ब्रह्मविद्याशास्त्रम्, यौगिकतत्त्वनिरूपणात्मकं शास्त्रञ्च यज्ञविद्याशास्त्रम्। यज्ञविद्या विश्वविद्या, ब्रह्मविद्या त्वात्मविद्येति विद्यापदार्थ**विवेकः**। ब्रह्मणि यज्ञः प्रतिष्ठितः, यज्ञाधारे च ब्रह्म विकसितम्। योऽयं विद्याविभागः पाश्चात्यविज्ञाने फिजिक्स-केमेस्ट्री शब्दाभ्यां प्रसिद्धः, सोऽयमेव विद्याविभागो विज्ञानकाण्डेऽस्माकं ब्रह्म-यज्ञशब्दाभ्यां प्रतिपादितः। येभ्यो हि मौलिकेभ्यस्तत्त्वेभ्यो रासायनिक-सम्मिश्रणद्वारा कश्चिदपूर्वो भाव उत्पद्यते, सोऽयं यज्ञपदार्थः **केमेस्ट्री**। मौलिकतत्त्वसंघातश्च ब्रह्म-पदार्थः–**फिजिक्सः**।

यज्ञश्चायं ब्रह्मणि प्रतिष्ठित इत्युक्तं प्राक्। अत एव यज्ञविज्ञानतः पूर्वं ब्रह्मविज्ञानमावश्यकम्। तस्यैतस्य ब्रह्मविज्ञानस्य निरूपणात्मकं शास्त्रं ऋग्वेदे मौलिकतत्त्वानामेव प्राधान्येन निरूपणमिति न न विदितं तद्विदाम्। यजुर्वेदस्तु यज्ञविद्याशास्त्रम्।

---

*[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्षम् १०, अङ्कः ४, माघमासः, वि.सं. २०१६) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभजयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः

यज्ञादेव सर्वे पदार्था आधिदैविकाधिभौतिकाध्यात्मिकाः समुत्पन्नाः, समुत्पद्यन्ते, समुद्भविष्यन्तीत्युक्तं यज्ञशास्त्रे– यजुः (संहिता ३१/१६) –

**यज्ञेन यज्ञमयजन्त देवास्-**
**तानि धर्माणि प्रथमान्यासन्।**
**ते ह नाकं महिमानः सचन्त**
**यत्र पूर्वे साध्याः सन्ति देवाः।।॥१॥**

स्मृतिरप्याह – गीता ३/१० –

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥२॥**

द्वौ पदार्थौ, बहवो वा एकत्र सम्भूय चितिसम्बन्धाख्येनान्तर्यामिसम्बन्धेन यज्ञस्वरूपं निष्पादयन्ति। यथाहि–अम्भः–पवमानाख्ययो–(हाईड्रोजनाक्सिजनपदार्थयो)श्चितिसम्बन्धात् स्थूलाः पेया आप उत्पद्यन्ते। यथा वा शुक्र-शोणितसमन्वयात् प्रजास्वरूपनिष्पत्तिः।गोमयकेल-पत्ररसयोः सम्मिश्रणात् वृश्चिकोत्पत्तिः। अब्वाय्वोः संयोगात् फेनोद्भवः। शरीराग्नि–याम्यवाय्वोः संघर्षात् स्वेदप्रसारः। अस्मिन् यज्ञसम्बन्धे रासायनिकसम्मिश्रणात्मके प्रत्येकदशायां द्वौ पदार्थौ नितान्तमपेक्षितौ। तयोश्चैको भावः अन्नादाख्यः, द्वितीयश्चान्नाख्यः। अन्नादो हि अग्निः, अन्नं च सोमः इति हि वैदिकी सामान्या परिभाषा। अग्निर्दाहकः, सोमो दाह्यः। अग्नौ सोमाहुतिर्यज्ञ इति हि **यज्ञनिष्कर्षः**।

सत्स्वप्यनेकेषु पदार्थेषु अग्नि–सोमयोरेव सर्वेषामन्तर्भावः। उष्णाः–शीताः अनुष्णाशीताः इति कृत्वा त्रिविधा एव सर्वे पदार्थाः। तेषु–उष्णास्तावदग्नावन्तर्भूताः, शीताश्च सोमे, अनुष्णाशीताश्च उभयोरिति–अग्नीषोमाभ्यामेवेदं जगद् व्याप्तम्। 'अग्नीषोमात्मकं जगत्' इति हि जाबालोपनिषत्सिद्धान्तः। तमेतं सर्वत्र सामान्यरूपेण व्याप्तमग्नीषोमविज्ञानं प्रतिपादयन्नाह वाजिश्रुतिः –

**'द्वयं वाऽइदं न तृतीयमस्ति–आर्द्रं चैव, शुष्कञ्च। यच्छुष्कं तदाग्नेयम्। यदार्द्रं – तत् सौम्यम्। अथ यदिदं द्वयमेवाप्यं, किमेतावत् क्रियत इति। अग्नीषोमयोरेवाज्यभागौ, अग्नीषोमयोरुपांशुयाजः, अग्नीषोमयोः पुरोडाशः ×××××अग्नीषोमयोर्ह वैतावती विभूतिः प्रजातिः'**। –शतपथब्राह्मणे

स एष अन्नादोऽग्निर्ब्रह्म। सोमस्तु यज्ञसाधकत्त्वात्– 'तात्स्थ्यात्ताच्छब्द्यमि' ति न्यायतो यज्ञः। अग्न्याधारे सोमप्रवृत्तिरिति ब्रह्माधारे यज्ञप्रवृत्तिः सिद्धा। योनिर्हि अग्निः, रेतो हि सोमः। प्रतिष्ठिता हि योनिः, गतिमद्धि रेतः। प्रतिष्ठितं हि ब्रह्म, संचरणशीलो हि यज्ञः। स एष अग्निरेव वेदस्य वेदभावः, वेदपदार्थो वा। त्रिविधा हीमे लोके भावा विद्यन्ते– निबिडावयवाः, तरलावयवाः, बाष्पावयवाः इति। तत्र घनभावा आग्नेयाः, तरलभावा वायव्याः, विरलभावाश्चैन्द्राः सौरा वा। घनावस्थापन्नोऽग्निः पार्थिवः, तरलावस्थापन्नोऽग्निर्वायुविधः अन्तरीक्ष्यः, विरलावस्थापन्नोऽग्निरादित्यविधो दिव्यः। अग्नि-वाय्वादित्यब्रह्माणि एव यज्ञस्वरूपसमर्पकानि।

अग्निस्तत्र पार्थिव ऋग्वेदस्य प्रतिष्ठाभूमिः, वायुरान्तरीक्ष्यो यजुर्वेदस्य, दिव्य आदित्यः साम्नाम्। आधिदैविकेऽस्मिन् वितानयज्ञे अग्निर्होता हौत्रकर्माध्यक्षः। वायुरध्वर्युराध्वर्यवकर्माध्यक्षः। आदित्य उद्गाता औद्गात्रकर्म्माध्यक्षः।

चतुर्थलोकाधिष्ठाता सोमरूत्वथर्वा ब्रह्मा ब्राह्मकर्म्माध्यक्ष:। त एतेऽग्निवाय्वादित्यचन्द्रमसो देवास्त्रयीवेदं पुरस्कृत्य सोमाहुत्या विश्वयज्ञं सर्वहुतनामकं निष्पादयन्ति। तदेतत् सर्वं यज्ञरहस्यमभिलक्ष्यैव भगवान् मनुराह – (१.२३) –

**अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजु: सामलक्षणम्।।**

स्पष्टं चेदं यज्ञरहस्यं शाङ्खायनब्राह्मणस्य षष्ठाध्याये, दशमब्राह्मणे ।तथाहि –

**'प्रजापतिस्तपोऽतप्यत। स तपस्तप्त्वा प्राणादेव-इमं लोकं प्राबृहत्। अपानादन्तरिक्ष-लोकं, व्यानादमुं लोकम्। स एतांस्त्रींल्लोकान-भ्यतप्यत। सोऽग्निमेवास्माल्लोकादसृजत, वायुमन्तरिक्षलोकात्, आदित्यं दिव:। एतानि त्रीणि ज्योतींष्यभ्यतप्यत। सोऽग्नेरेवर्चोऽसृजत, वायोर्यजूंषि, आदित्यात् सामानि। स एतां त्रयीं विद्यामभ्यतप्यत। स यज्ञमतनुत। स ऋचैवा-शसत्, यजुषा प्रातरत्, साम्नोदगायत्। अथैतस्या एव त्रय्यै विद्यायै तेजो रसं प्राबृहत्, एतेषामेव वेदानां भिषज्यायै। स भूरित्यृचां प्राबृहत्, भुव इति यजुषां, स्वरिति साम्नाम्। तेन दक्षिणतो ब्रह्मासीत्। तस्य दक्षिणतो वर्षीयानुदीचीन-प्रवणो यज्ञ: संतस्थे। तस्य ह वै दक्षिणतो वर्षीयानुदीचीनैव प्रवणो यज्ञ: संतिष्ठते-यस्यैवं विद्वान् ब्रह्मा भवति।'** – शाङ्खायनब्राह्मणे ६/१०

देवताविज्ञानमनु–एकस्यैवाग्नेस्तिस्रोऽवस्था अग्निश्च, वायुश्च, आदित्यश्चेति। भूपिण्डकेन्द्रस्थ: प्राणाग्निरमृताग्निरेव रसरूपेणोर्ध्वं गच्छन्–अवस्थातारम्यात् त्रिधा विभक्तो जायते। अतएव– **'अग्निपुरोगा: सर्वे देवा: प्रीयन्ताम्'** – **'अग्निमुखा वै सर्वे देवा:'** – **'अग्नि: सर्वा देवता:'** इत्यादि निगमा: संगच्छन्ते। रसाग्निरेवावस्थाविशेषनिबन्धनादग्निश्च भवति, वायुश्चेन्द्रश्चेत्याह वाजिश्रुति:–

**'आपो वा अर्क:।तद्यदपां शर आसीत्-तत् समहन्यत। सा पृथव्यभवत्। तस्यामश्राम्यत्। तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्त्ततार्ग्नि:।स त्रेधात्मानं व्यकुरुत-आदित्यं तृतीयं, वायुं तृतीयम्। स एष प्राण: (प्राणाग्नि:) त्रेधा विहिता:–'** (शत. १० का. ६/६/२–३)।

अत एव वेदत्रय्यामग्निनैवोपक्रमो दृश्यते। यथापि– **'अग्निमीळे पुरोहितं होतारं रत्नधातमम्'** इति ऋग्वेदोपक्रम:।**'अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्'** इति यजुर्वेदस्य। **'अग्न आयाहि वीतये गृणानो हव्यदातये'** इति सामवेदस्य। ऋचां प्रतिष्ठाभूतस्य पार्थिवाग्नेरस्मदपेक्षया पुरोऽवस्थितत्त्वात्, तत् प्रधानाग्नये **'पुरोहित'** इत्युक्तम्। वायुमयाग्निरेवात्रपतिरान्तरीक्ष्य:। **'वायुर्वै-वृष्ट्या ईशे'**, वृष्टेरन्नम्। तत: प्रजा:। आतश्च तत्प्रधानाग्नये वायुविधाय **'अग्ने व्रतपते'** इत्युक्तम्। दिव्योऽग्निरादित्यो भूपृष्ठादतीव विप्रकृष्टतम:। यो हि विप्रकृष्टो भवति, तस्यैवाह्वानं सम्भवति, अतएव विदूरस्थिताय दिव्याग्नये– **'अग्न आयाहि' इत्युक्तं** सङ्गच्छते।

तस्यै तस्याग्नेस्त्रैविध्यादेव विश्वविद्या, विश्वविज्ञानं वा त्रिधा विभज्यते–अग्निविज्ञानम्, वायुविज्ञानम्, आदित्यविज्ञानञ्च। तत्राग्निविद्या पार्थिवी–आधिभौतिकी। आदित्यविद्या दिव्या

आधिदैविकी। वायुविद्या-आन्तरीक्ष्या आधिया-ज्ञिकी इति। मध्यस्थो वायुरेवाग्न्यादित्ययोर्यजनात् यज्ञं वहति, यजुः प्रधानत्वात्। समष्ट्या च आध्यात्मिकविद्यायाः स्वरूपं निष्पद्यते। तदित्थं '**चतुष्टयं वा इदं सर्वम्**' इति-कौषीतकिश्रवणात् अनन्ताः खण्डविद्या विद्याचतुष्टय्यामेवान्तर्भूता इत्यवगन्तव्यम्। पाश्चात्त्यविदुषां कृते तु यज्ञविद्याया आधिभौतिकविज्ञाने-एव समावेशः। तेषाञ्चेदं 'मेटीरियलसायन्सा'भिधं विज्ञानं **आधिभौतिकविज्ञानं, आध्यात्मिकविज्ञानं, आधिदैविकविज्ञान**मित्येवं विभक्तं द्रष्टव्यम्। तान्येवैतानि त्रीणि विवर्तानि पदार्थविज्ञानं, शारीरिकविज्ञानं, **ताराविज्ञान**मित्येवं क्रमेण प्रसिद्धानि तत्र विज्ञान-काण्डे। सर्वाण्यन्या विद्या अग्नि-वाय्वादि-त्येष्वन्तर्भूता अन्ततो वेदमूला एव विस्पष्टं 'वेदस्य सर्व विद्यानिधानत्त्वम्' इति"। –क्रमशः

– मानवाश्रम, दुर्गापुरा

[विशिष्टोऽयं लेखो 'भारती' पत्त्रिकायां पूर्वं (वर्षम् १०, अङ्कः ५, फाल्गुनमासः, वि.सं. २०१६) प्रकाशितोऽधुनाऽऽ-दर्शरूपेण कौस्तुभजयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः।

## पाठक-प्रतिक्रिया

'**भारती**' संस्कृतमासपत्त्रिकायाः नवम्बर-मासस्य **कौस्तुभजयन्तीविशेषांकं** पठित्वा महान् मोदः मनसि अजायत। सर्वे आलेखाः ज्ञानवर्धकाः शोधपरकाः प्रासंगिकाः महत्त्वपूर्णाश्च सन्ति। गुरुवर्याणां आचार्याणां **श्रीकृष्णशर्म**महाभागानां सम्पादकीयं सारगर्भितं, ज्ञानप्रदं, पत्रिकायाः परिचयात्मकं चास्ति। सम्पादकमहोदयेन सूक्ष्मेक्षिकया उपादेयान् महत्त्वपूर्णान् च आलेखान् चित्वा अंकः सम्पादितः। पत्रिकायामागताः स्वामि**सुरजनदास**- पं. **मोतीलालशास्त्रि** - **सातवलेकरादीनां** बहूनां संस्कृतविदुषां मौलिकाः शोधात्मकाः आलेखाः पत्रिकायाः महद् वैशिष्ट्यं सूचयन्ति। गुरुवर्याणां डॉ. **नाथूलाल-सुमन**महा-भागानां 'राजस्थानस्य संस्कृतज्ञाः क्रान्तिकारिणः' इति आलेखो विमर्शपरको विवरणात्मकः प्रशंसनीयश्च वर्तते यस्मिन् पं. अम्बिकादत्त-व्यासमहाभागतः श्रीगिरिराजशास्त्रिमहोदयपर्यन्तं पंचदशराजस्थानीयानां क्रान्तिकारिणां संस्कृतज्ञानां परिचयात्मकं विवरणं संक्षिप्य योगदानं च वर्णितम्। इत्थमन्ये सर्वेऽपि आलेखाः सर्वथा उपादेयाः सन्ति। अन्ते नारीस्तम्भः आयुर्वेदस्तम्भश्च पूर्ववदनुकरणीयौ ग्राह्यौ च। इत्थमयं सर्वांगपूर्णः विशेषांकः ऐतिहासिकज्ञानवर्धनादिदृष्ट्यापि पठनीयो ,रक्षणीयो , ग्रहणीयो महत्त्वपूर्णो विद्यते। एतदंकप्रकाशनाय समादरणीयाय **सम्पादक**महोदयाय भूयांसि वर्धापनानि समर्प्य प्रणौमि तम्।

महामहोपाध्यायः **डॉ. बाबूलालः मीना**,
सहाचार्यः, संस्कृतविभागः, दिल्लीविश्वविद्यालयः,
दूरभाष : ९४१४८६१२८३

क्रमशः

# पृथुवंशम्

(एकादशस्सर्गः)

❑ कविसार्वभौम अभिराजराजेन्द्रमिश्रः
पद्मश्रीः

*पितरि दिवमुपाते राजदण्डं स्वहस्ते, पृथुसुतविजिताश्वस्साधु जग्राह सद्यः।*
*रणशिरसि विजेता शौर्यमूर्तिर्मघोनः, प्रकृतिमनसि बाल्यादेव बिभ्रत्प्रतिष्ठः।।१।।*

*स च पितृतनुबिम्बो वेदधर्मानुलीनः, ऋतसरणिपुरोधा न्यायमूर्तिर्महात्मा।*
*नयविनयनदीष्णो वैष्णवीं पूतपद्मामुपगत इहलोकं पालयामास यत्नैः।।२।।*

*पितृपतिवरुणेन्द्रश्रीददिग्भिस्समृद्धो, ग्रहविचरणभूमिव्योमकल्पस्स राजा।*
*पितुरधिगतराज्यं तद्ददौ बान्धवेभ्यः, प्रकृतिनियमकृच्छ्रादात्ममुक्तिं प्रकल्प्य।।३।।*

*ककुभमथ ददौ तां वासवीं सोदराय, प्रथितरणविजेत्रे हारिहर्यक्षनाम्ने।*
*यमदिशमपि तस्मै धूम्रकेशाय हृष्टः, वरुणदिशमदात्सः बन्धवे तां वृकाय।।४।।*

*द्रविणरुचिरनाम्ने चाप्युदीचीं स दत्वा, स्वयमपि नृपधान्यां संश्रयन्मन्त्रिवर्गः।*
*चतुरुदधिहृदन्तः सुस्थिरो वाडवाग्निप्रतिमतरणितेजा लोकमुग्रं शशास।।५।।*

*प्रतपति विजिताश्वे दस्युभीतिर्न राज्ये, प्रकृतिषु नहि शोको मृत्युजन्यो न दैन्यम्।*
*षड्ऋतुसमनुकूला सत्फलानां समृद्धिः, भुवि परिणतशस्यं भूमिगर्भे च कन्दाः।।६।।*

*विपदपि न रुजां काऽप्यान्तरिक्षी न बाधा, क्षितिवपुषि न कम्पा नैव शम्पातिपाताः।*
*जलनिधिहृदये नो क्षुब्धकल्लोलकल्को, न खलु जनपदेषूद्दामदुर्भिक्षकोपः।।७।।*

*सजलजलधराणां वृष्टिभिर्वाञ्छिताभिः, फलकुसुमसमृद्ध्या चापि वीरुद्द्रुमाणाम्।*
*अवनिजखनिजानां शैलजोपायनानां, प्रचितसमुपलब्ध्या सौख्यमासीत्प्रजानाम्।।८।।*

*सततमखजधूमैर्निर्मिता वारिवाहास्तरणिखरमयूखोत्तापजैः सैन्धवैस्तैः।*
*सह वियति मिलित्वा यत्सुधाम्भांसि मह्यै, ननु वितरितवन्तस्तेन साऽभूत्समृद्धा।।९।।*

*प्रणतिपरमनोभिर्भ्रातृभिर्भक्तिमद्भिर्नियतपरिकरैश्चामात्यसंघैरुपास्तः।*
*पृथुसुतविजिताश्वो लीलया राज्यभारं, घनसमयशिलीन्ध्रश्चैव मत्वा बभार।।१०।।*

*शतमखकृपयान्तर्धानशक्तिप्रपन्नः, स खलु तदभिधानं चाऽप्यलं सञ्चकार।*
*अलभत सुतरत्नं स्वं **हविर्धान**संज्ञं, कुलपुरुषगुणर्द्धं तं **नभस्वत्**युदीतम्।।११।।*

*नृपतिरथ हविर्धानाभिधोऽवाप पुत्रान्, शुचिहृदयमहिष्यां पत्युराख्यां दधत्याम्[१]।*
*सुचरित**विदुराया** बर्हिषच्छुक्लकृष्णव्रतजितगयसत्यान् षण्मितान् दिप्वरातीन्[२]।।१२।।*

---

*१. हविर्धानीति।   २. रिपवः कामक्रोधमदलोभेर्ष्यासूयाः। तेषां रिपवो विरोधिनो वा।*

धृतरतिरथ योगे नैगमे कर्मकाण्डे, विबुधजनमनोज्ञे चाध्वरे नित्यदीक्षः।
अभवदमितशंसो बर्हिषद्वैजिताश्वो, द्विजमहितनिसर्गः कर्मणा क्षत्रतेजाः।।१३।।

विततसततयज्ञैः प्रीणितास्तेन देवाः, किमुत, धरणिरेषा येन छत्रा कुशौघैः।
प्रथितघटनमेवेदं समाख्यैकहेतुः, विपुलजगति जातो बर्हिषच्चेतिसंज्ञः।।१४।।

स्मरशततनुकान्तिं तत्तनौ चाऽप्यमान्तीं, नवतरिणिविभाभां मादयन्तीं दधानः।
रुचिरवदननासो व्यूढवक्षाश्च सौम्यो, विलसितकुशपाणिर्दाडिमीदिव्यदन्तः।।१५।।

उदरनतवलीकश्शोणिताम्भोजनेत्रोप्यसितनिविडवक्रैर्मूर्द्धजैर्व्याप्तशीर्षः।
धवलजलधिशङ्खग्रीव ऊर्ध्वोत्तमाङ्गो, युववयसि निविष्टो बर्हिषत्सम्बभासे।।१६।।

परिघनिभभुजोऽसौ कम्बुकुन्देन्दुगौरः, स्मितलसदधरश्रीः प्रांशुरावर्तनाभिः।
परिणयनटरङ्गे कामितः कामिनीनां, ललितनृपसुतानां स्याद्धविर्धानसूनुः।।१७।।

कुसुमसितसमज्ञा राजसूनोर्यतोऽहन्, युवतिनिचितभूभृद्राजसौधानपाव।
परिणयसुमुखीनां स्वापसौख्यं विलुप्तं, धवलमुकुरसख्यं द्राग्विवृद्धं परोक्षम्।।१८।।

निधुवनवरटास्ते दारिकाणां दृगब्धौ, निभृतमिह तरीतुं रेभिरे मन्द्ररावाः।
विषमरतिनिदाघे दृष्टनष्टा मरीच्यो, जलदसलिलसिक्ता द्रागलक्ष्यन्त भूम्यः।।१९।।

पृथुसुतसुतसूनोश्चारुचर्चाविरोधे, ननु पथिकजनानां दूरवार्ताप्रमाणैः।
यदवधि हि समुत्था हन्त वैखानसीनां, निजमपि बत गात्रं ह्यन्यदीयं नु जातम्।।२०।।

तरुणरविरुदेति प्रत्यहं प्राचि, सायं वरुणदिशि समुद्रे जायतेऽसौ विलुप्तः।
विधुरपि बहुरूपो यामिनीं भण्डकल्पः, रमयति नृपकन्या जज्ञिरे न्वेतदेव।।२१।।

कति न नृपतिकन्यास्तं पपुः पार्वणेन्दौ, कति न निशि सुषुप्तौ सङ्गतास्तेन जाताः?
कति न गुणसुधौघं वन्दिवक्त्रोदितं वा, निभृतमपि निलीना तस्य दीनाः पपुर्नो??२२।।

क्व नु परिणयचर्चा नो हविर्धानसूनोः, शमदममखदीक्षाश्चापि नो चर्चिता वा?
श्रुतिपथमुपयातां भोगयोगप्रगाथां, निजहृदि दधतीनां सुभ्रुवां सम्भ्रमोऽभूत्।।२३।।

तपसि निहितचित्तोऽयं विरक्तो भवेद् वा? रमयति रतिनाथं यौवने वाऽऽसभार्यः।
इति मनसि युवत्यस्ता वयस्सन्धिरूढा, हृदि सपदि समीहान्त्वक्रिरे रुढदोलाः।।२४।।

इति विषमसमस्याक्रान्तकाले समुद्रः, कलितवरुणरूपो वल्लभश्चापगानाम्।
परिषदि विचिचिन्त स्वात्मजाया विवाहं, नृपकुलपरिवेशे ख्यापयित्वाऽथ दूतैः।।२५।।

ललितजलधिकन्या सा शतद्रुत्युपाह्वा, रतिविरतिसमर्था विभ्रमोर्ध्वैर्विलासैः।
जितमदनवनश्रीर्न्यक्कृताऽमर्त्यवामा, विलसति पतिकामा सेत्ययुञ्जन् युवानः।।२६।।

– क्रमशः

क्रमशः

# सीमन्तसिन्दूरम्

❑ डॉ. महेशचन्द्रशर्मा गौतमः
(साहित्याकादेम्या पुरस्कृतः)

विश्वस्य नैकेषां देशानां नेतार आतङ्कस्य प्रवर्तकानामेतज्जघन्यं दुष्कृत्यं भृशमनिन्दिषुः। संयुक्तराज्यामरीकाया राष्ट्रपतिट्रम्पमहाभागो यद्यपि भारत-पाकिस्तानयोर्मध्ये युद्धमपवर्तयितुं परामृक्षत् परं समकालमेव स आतङ्कस्य प्रवर्तकानुपयुक्ततया दण्डयितुमपि परामृक्षत्। स आतङ्कस्य समुत्पत्तिं दुर्भाग्यपूर्णां कथयन्नपराधिनस्तेषां प्रवर्तकांश्च दण्डयितुं प्रत्युत्क्रमे भारतस्य पक्षं समार्तथत। ट्रम्पमहाभागः पाकिस्तानस्य शासकान् निरदिक्षद् यदातङ्कस्य प्रवर्तकानां मार्गणे ते भारतस्य साहाय्यं विदध्युः।

रूसदेशस्य राष्ट्राध्यक्षः पुतिनमहाभागो व्याहार्षीद् यद् आतङ्कस्य प्रवर्तकान् सम्यग्दण्डयितुं प्रत्युत्क्रमे तस्य देशः सर्वथा भारतेन सह स्थास्यति। एवमेव संयुक्तारबामीरातेजरायलाफगानिस्तानफ्रांसभूटानबंगलादेशप्रभृतयो विश्वस्य नैके देशा न केवलं सर्वथा भारतस्य पक्षं समार्तथन्त, अपितु इजरायलः फ्रांसो रूसश्च तु शस्त्रास्त्रैरपि भारतस्य साहाय्यकारिणो वर्तन्ते।

संयुक्तराष्ट्रसंघस्य महासचिव एंटोनियोगुटेरेसः पहलगामे संवृत्तं क्लीवैरातङ्कस्य प्रवर्तकैः कृतं हिंसाया जघन्यं ताण्डवं भृशमनिन्दीत्। यद्यपि युद्धस्य भयावहं परिणामं प्रत्युद्बोधयन् सोऽचकथद् यदुपक्रान्ते युद्धे स्यात् स्थितिरनियन्त्रिता जायेतेति युद्धमपवर्तयितव्यं तथाप्यातङ्कस्य प्रवर्तका नियतमेव दण्डयितव्याः। रूसो जापानदेशश्च संयुक्तराष्ट्रसंघे भारतस्य पक्षं सनिर्बन्धं समार्तथेताम्।

टिप्पणी : प्रत्युत्क्रमे – बीड़ा उठाने में।

संयुक्तराज्यामरीकाया रक्षासचिवः पीटहेगसेठो दूरभाषेण भारतस्य रक्षामन्त्रिणं राजनाथसिंहमहाभागं व्याहार्षीद् यत्तस्य देशस्य शासनमातङ्कस्य विरुद्धं विधीयमानेऽस्मिन् संघर्षे सर्वथा भारतं समर्थयते। राजनाथसिंहस्तस्य समक्षं पाकिस्तानस्य नैकेषु देशेष्वातङ्कप्रवर्तनस्येतिहासं सविस्तरमववर्णत्।

आतङ्कस्य प्रवर्तकाः पर्यटकान् तेषां धर्मं पृष्ट्वानालोचितं हिन्दून् गतजीवितान् व्यधुः। हिन्दूधर्मावलम्बिनां मुस्लिमधर्मावलम्बिनाञ्च मध्ये पारस्परिकघृणाया उद्भावनमवर्तिष्ट तेषां लक्ष्यम्। अथापि भारतस्य मुस्लिमा न केवलमिमां समुत्पत्तिमनिन्दिषुरपितु प्रतिविधाने पाकिस्तानस्य विरुद्धं शासनेन सहांसांसिसंहता अदर्शिषत।

जलसंविदाया निरसनमवर्तिष्ट पाकिस्तानस्य मर्मस्थले कृतः सातिशयं प्रबलः प्रहारः। चिनाबनद्या बग्लिहारसेतुबन्धस्य द्वाराणां पिधानं सपद्येव पाकिस्तानं प्रति गच्छच्चिनाबनद्या भाण्डं जलहीनं कर्दममात्रञ्च व्यधात्। सलालजलविद्युत्परियोजनायामपि जलप्रवाहस्य निरसनं पाकिस्तानस्य क्षेत्रं जलविहीनं तृषार्तञ्च विधास्यतीत्यवर्तिष्ट शत्रूणां कृषिव्यवस्थायामसह्यः

प्रबलतमश्च प्रहारः। यथावश्यं यदापि सेतुबन्धद्वाराणि विवृतानि विधास्यन्ते सपद्येव पाकिस्तानस्य क्षेत्रं जलमग्नं भविष्यतीति भविष्यत्यन्यो भूयोऽपि प्रबलः प्रहारः। अतः पूर्वं संविदानुसारं भारतं सर्वान् गतिविधीन् विधिवत् तत्त्वतश्च पाकिस्तानायासुसूचत् परं संविदाया निरसनानन्तरमेषा परम्परापि स्वत एव निरस्ता भविष्यति।

टिप्पणी : अंसांसिसंहताः – कंधे से कंधा मिलाकर।

प्रतिविधातुं भारतमवस्कन्त्स्यतीति भयाक्रान्तं पाकिस्तानशासनं नैकप्रकारेण युद्धमपवर्तयितुं प्रायतिष्ट, परं भारतस्य निर्भीको वीरश्च प्रधानमन्त्री श्रीनरेन्द्रमोदीमहाभागो वायुसेनाध्यक्षं जलसेनाध्यक्षं स्थलसेनाध्यक्षञ्चाहूय प्रहारार्थं स्थानस्य समयस्य च चयनस्य पूर्णं स्वातन्त्र्यं तेभ्योऽदात्।

– गौतम मार्किट, सनौरी गेट, पटियाला-147001

मो. – 97811-24775

# भारतीपत्रिकासप्तकम्

❑ डॉ. प्रीति आर. पुजारा

(बालसाहित्याकादमी-पुरस्कृता)

*ज्ञानगङ्गा यया वाहिता भूतले*
*तत्परा देवभाषाहितेऽहर्निशम्।*
*संस्कृताकाशमध्ये सदा राजताम्*
*भारतीपत्रिका भास्वराचन्द्रिका।।१।।*

*शारदा सुन्दरी सेव्यते याऽनया*
*लोककल्याणमन्त्रो यया स्वीकृतः।*
*सा कवीनां यथा कण्ठभूषा नवा*
*भारतीपत्रिका शंसनीया भवेत्।।२।।*

*मोहयन्ती मनांसि प्रिया चञ्चला*
*काव्यसिन्धौ मुदा मज्जयन्ती यथा।*
*ज्ञानशालेव या वर्ण्यते कोविदैः*
*भारतीपत्रिका कीर्तनीया भवेत्।।३।।*

*भारतीपत्रिकेयं कवीनां सखी*
*प्रेमतोयैर्यया कश्मलं क्षय्यते।*
*वर्धते वेदना पीडनं मानसे*
*शीतलं चन्दनं* ***मर्षति*** *पत्रिका।।४।।*

*संस्कृतं संस्कृतिं रक्षणे व्यापृता*
*पाठकानां कृते कल्पवल्ली नवा।*
*सीव्यति स्नेहसूत्रैः समस्तां धराम्*
*भारतीपत्रिका काशतां भूतले।।५।।*

*भारतीपत्रिकां लालयन् दृश्यते*
***कृष्णशर्मा*** *स्वयं पुत्रिवद् दृश्यताम्।*
*संस्कृतं मे सनाथं कृतं येन भो!*
*चारुसम्पादने संनिविष्टः सुधीः।।६।।*

*भारतीवल्लकी झंकृता भूतले*
*सर्वभूतात्मतत्त्वं समुद्घाटितम्।*
*कर्मठः शारदासेवकः पण्डितः*
***कृष्णशर्मा*** *चिरं जीवताद् भूतले।।७।।*

– सहायकाचार्या, संस्कृतविभागः,

डी.सी.एम. कला-वाणिज्यमहाविद्यालयः,

वीरमगाम-**अहमदाबाद**-गुजरात

दूरभाषः – ९४२८१२४५६६

पूर्वानुवृत्तम्

# पहलग्रामातंकहाहाकार:

❑ डॉ. रामनारायण: झा:

६१

नूनं भो प्रलये यथा शशिधरोऽखर्वं विनाशी जगत्,
सद्यो लोपयते तथा झटिति तं संलोपयेन्निर्दयम्।
मिथ्यालापिनमद्य धूर्तचरितं पाखण्डयन्त्रालयं
चातंकाख्यमहोदधिं नु नरकं मायाविनं पन्नगम्।।

६२

प्राहन् भीषणशक्तिकं बकमिव प्रोद्दामचेता विनाऽऽ-
यासं वाशु वृकोदरस्त दिव भो! पाकं च चूर्णं क्रुधा।
राष्ट्रं मेऽद्भुतशक्तिमत्प्रभुतमं नूनं सदासाहसि,
सोच्चं साधु जगर्ज भीषणतमं वैज्ञानिकेनोर्जसा।।

६३

षड् वा विंशतिसंख्यका विनिहताश्चातं किमि: गोलिका-
भिर्नूनं नवदम्पती प्रभृतयश्श्रुत्वेति राष्ट्रं रुषा।
ध्मातश्चानु धनञ्जयो बहुतरं रक्ताभिधो वक्षसां
तूर्णन्तान् विददार बान्धकदनून् वै रासभान् बालिशान्।।

६४

रामश्शस्त्रभृतां यथा विहतवान् लंकेश्वरं रावण-
मन्यान् युद्धधुरन्धरस्सुदयितश्शूरो महातेजस:।
तान् हन्यात् सदनानि तस्य विजधान् शेषाश्चवप्रेतजान्
सेनाभिस्समितिं जयो बलवतां मोदी प्रजावत्सल:।

६५

नृत्यन्नैव नु ताण्डवं प्रलयके नित्यं विधन्ते महद्
गंगेशो हि यथा तथाऽद्य सततं कुर्य्याच्च देशोऽधुना।
प्रात: कै: परिपीडित: परिहत: खिन्नो वितुन्नस्तुदाऽ
तोऽसौ कांक्षति राम एष कविताकर्त्ता सुशान्त्यै क्रुधा।।

६६

छद्मी चोत्कुरुते पुन: पुनरहो प्रातंकवादेर मस
त्रायस्वाथ हि मां विधेहि सुदयां हाहेति शब्दै: पुन:।
जीवेमाद्य कथन्नु भाविसमये तोयं विना भो! वयं
कुर्य्यामैव न काटवं नतनत: मन्त्रैर्यथा पन्नग:।।

६७

हाहाकारवयोशिरश्चजनताश्चिन्तातुरा भाविनं
कालं हा सुविचिन्त्य सिन्धुसलिले क्रन्दन्ति नूनं प्रजा:
आक्रोशन्ति रुदन्ति हा विलपनं कुर्वन्ति शोचन्ति हा
चात्मानं हतभाग्यमेव सुतरां बुक्कन्ति मत्वाऽधुना।।

६८

पुच्छन्नैव च नैव चार्जवमहो यातीति जानीमहे
तद्वच्चास्ति सदा कुशीलवमयश्छद्माकर: कुक्कुर:।
वाऽस्मिन्नैव ह विश्वसेत्कथमपि प्राणच्छिदि प्राकृते
वक्रं भो हि शुनां द्विषा छलयते क्रूरोऽसुरो विद्विषत्।।

६९

दुष्टानां स शिरोमणि: दुरितजा: प्रातंकवर्धापको
नूनं भो! हि बिलेशय: किल ततो लंकापतिर्वा तत:।
भौमो वा नु ततोऽपि-हा मधुरसौ कुम्भो निशुम्भस्तत:
धूम्राक्षो महिषासुरो निरवयान्कंसाधिको राक्षस:।।

७०

दम्भी द्रोहितमो निशाचरगिरिर्लोभी विशसोऽथवा
ऽदभ्रो दार्दुरिको दरिद्रहृदयो नक्रोऽनयी रौरव:।
वीटो वा मकरोऽतिकण्टक इति क्रोधी सदागोमयोऽ
सूयी मत्सरवान् विकारमतिकस्सज्जोऽस्ति मर्तुं किल।।

७१

नाश्यो मोदिभिरेव दुष्टदलनै: प्रातंकवातो व्रति-
भि: पूर्वं महतां महद्भिरखिलश्शत्रुंकर्षैर्नायकै:।
नेतॄणां नववज्रभौरतितरां प्रातंकपोष: कित-
वानामक्रिमदेश एष कलितोऽपाको महाप्रेषक:।।

७२

धूर्तीयान् कुटिल: कुचेष्टतिमिर: कार्पण्यदोष कृश:
सर्वारिष्टचमूपति: कलिमल: प्रातंकचञ्चूच्चय:।
मायावी कपटी करालकृतको नित्यापचारी करे
सर्वान्नीन दुबाध यो विचरति प्रात: कपालं नयन्।।

– क्रमश:

# शीघ्रप्रतिक्रियाकूटसङ्केतः (QR Code)

❑ डॉ. हर्षदेवमाधवः

केवलं
हृदयस्य
शीघ्र-प्रतिक्रिया-कूटसङ्केतः
हृदयान्तर एवास्ति
कूटलिपौ
अतः
हृदयमेवोद्घाटय
प्रेमराशिं स्वीकर्तुम्।

यदि
ईश्वरस्य
शीघ्रप्रतिक्रियाकूटसङ्केतं लभेय
अहं
विना
विलम्बं
मम सर्वस्वं
स्थानान्तरं कुर्याम्।

कदाचित्
प्रेम्णः
शीघ्रप्रतिक्रिया-कूटसङ्केतं प्राप्य
सूक्ष्मतया विलोकयितुं
परीक्षामहे
तदा भवन्ति
तत्र
छलप्रपञ्च-वैर-वासना-लुण्ठन-व्यवहाराः
भवन्ति
ते लुण्ठन्ति
जीवनरसं नः।।

या
प्रथमरहस्सङ्गते
हृदयस्य
शीघ्रप्रतिक्रिया-कूटसङ्केतं
ददाति याचते वा
सा मायाविनी
तव हृदयमूषरं करोतीति
जानीहि मूढहृदय!

केवलं
योगिन आज्ञाचक्रेणैव
कर्तुं शक्या
प्रतिलिपिः (Scan) शक्या
तमसि
तारकेषु
अलिखितस्य
परमरहस्यस्य
शीघ्रप्रतिक्रियाकूटसङ्केतस्य।

यस्याः समीपे हृदयमेव
न भवेत्
सा
प्रेम्णः
शीघ्र-प्रतिक्रिया-कूटसङ्केतं
कथं दातुं शक्नुयात्, बत?

- ८, राजतिलक बंगलो, आबादनगर बस स्टॉप
के पास, बोपल, अहमदाबाद-३८००५८

# विभिन्नशास्त्रानुगुणं वृत्तेः स्वरूपम्

❑ अंकितशर्मा

'वर्ततेऽस्मिन्निति' इति मनुस्मृत्यमरकोशानुसारं 'वृत्तिर्वर्तनं जीवने'। भारतीयवाङ्मये वेद-शैवागम-शाक्ततन्त्र-न्यायवैशेषिक-सांख्ययोग-पूर्वमीमांसा-वेदान्त-व्याकरणेषु एवम् अलङ्कार-शास्त्रीयग्रन्थेषु वृत्त्या अवधारणा वर्तते। वृत्तिशब्दस्य सर्वप्रथमप्रयोगः अथर्ववेदस्य 'पैप्पलादसंहितायां' कृतः। एवं लोके 'वृत्तिः' इति शब्दः भिन्नेषु एवार्थेषु प्रयुज्यते। निरुक्तकोशादिग्रन्थेषु वृत्तिविचारः उपलभ्यते। संस्कृतकाव्यशास्त्रे शब्दशक्त्याः सन्दर्भे 'वृत्ति' शब्दस्य प्रथमः प्रयोगकर्ता भट्टोद्भट्टोऽस्ति।

सृष्ट्या उत्पत्त्याधारेण यस्य पदार्थस्य कारणता अनादिकालात् कल्पितास्ति 'वृत्तिः' तस्मात् भिन्नम् अन्यवस्तु नास्ति। तत्त्वतः सा 'वृत्तिः' शक्त्याः नामान्तरम् अस्ति यस्या अभावे शक्तस्य सम्भावनाऽपि न सम्भवेत्। भारतीयवाङ्मये एषा आद्या-आत्मा-भाव्या-माया-भव्या-सत्ता-कला-परा-प्रकृति-बुद्धि-गति-चिति-इत्याद्यभिधानेषु अभिहिता अस्ति। इयं परमात्मनः अचिन्त्यमहिम्नः स्वातन्त्र्यं वर्तते।

लोके जीविका वृत्तिरिति कथ्यते। अध्यात्मवादिनोऽनुसारं काम-क्रोध-लोभ-मोह-मद-मत्सरान् दूरीकर्तुं मानापमानरहितान् प्राप्तये उपायभूतातिस्रः वृत्तयः मन्यन्ते। भोजनार्थं क्वचित् याचना भिक्षावृत्तिः भवति, याचनां विना कस्मात् क्वचित् प्राप्तिः उत्सृष्टवृत्तिः भवति, एवं प्राप्तवस्तु इति संतोषमिति च यथालब्धवृत्तिः भवति।

**न्यायशास्त्रे** वृत्तिशब्दः अनेकार्थेषु प्रयुक्तः। कुत्रचित् सन्निकर्षार्थे प्रयुक्तोऽस्ति, कुत्रचित् ज्ञानार्थे, एवम् अन्यस्मिन् स्थाने आधेय आधेयता एवम् आधेयतावानपि अस्ति। वेदान्तानुसारेण अन्तःकरणस्य परिणामः वृत्तिरस्ति। यथा- सरोवरस्य जलं कस्मादपि छिद्रात् निःसृत्य केनापि माध्यमेन क्षेत्रं प्रविश्य क्षेत्राकारं गृह्णाति तथैव चेतन इव अन्तःकरणमपि नेत्रादिमाध्यमेन घटादिविषयाणां प्रदेशेषु प्रविश्य तेषाम् आकारं गृह्णाति इति। अन्तःकरणस्य परिणामोऽयमस्ति। एवमेव एषा वृत्तिरपि भवति।

**सांख्यशास्त्रे** महदादीनाम् इन्द्रियाणां च व्यापारः वृत्तिः कथ्यते। रूप-रस-गन्ध-स्पर्श-शब्दादिषु पञ्चेन्द्रियाणाम् प्रवृत्तिः अपि वृत्तिः कथ्यते। वचनम्-आदानं-विहरणम्-उत्सर्ग-आनन्दः च कर्मेन्द्रियाणामेव वृत्तयः सन्ति। उक्तं च -

**'रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।**
**'वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्'।।**[1]

योगशास्त्रे चित्तस्य परिणामः वृत्तिः कथ्यते। क्लेशयुक्ताः क्लेशमुक्ताश्च पंचवृत्तयः सन्ति। उक्तं च-

**वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाश्च,**
**प्रमाणविपर्ययविकल्पनिद्रास्मृतयः।।**[2]

संस्कृतकाव्यशास्त्रे शब्दव्यापारस्य कृते 'वृत्तिः' इति शब्दस्य प्रयोगं 'भट्टोद्भट्टः' कृतवान्।

भरतः वृत्तिं काव्यस्य नाट्यस्य चैव मातरम् उक्तवान्। एषा वृत्तिः कवि-व्यापारस्य फलमस्ति। कविवरस्य नाटककारस्य वा हृदये यदा रसस्य अवस्थाविशेष आविर्भवति तदा काव्यस्य नाट्यस्य वा सर्जनं भवति।

**'सर्वेषामेव काव्यानां वृत्तयो मातृकाः स्मृताः।'**[3]

अस्मिन् सम्बन्धे भरतस्य टीकाकारः अभिनवगुप्तः उक्तवान् यत् वर्तनशब्दः जीवनस्य समानार्थः शब्दोऽस्ति। एवं जीवनस्य सहकारित्वात् जीविका अपि वृत्तिः कथ्यते। इत्थं वृत्त्याः सामान्यार्थः- 'धर्मार्थ-काम-मोक्षाणां उपलब्धौ सहायको व्यापारः' फलति। काव्यजगति किमपि वर्णनं व्यापारशून्यं न भवति। अतः सम्पूर्णमेव 'काव्यजगत्' निर्बाधरूपेण वृत्त्याः परिधौ आयाति। अस्मादेव हेतोः एषा वृत्तिः काव्यस्य 'माता' इति कथ्यते। 'तस्माद् व्यापारः पुमर्थसाधनको वृत्तिः। स च सर्वत्र वर्ण्यते इत्यतो वृत्तिः काव्यस्य मातृका इति। न किंचित् व्यापारशून्यं वर्णनीयमस्ति।

भरतस्यानुसारेण वृत्तयः चतस्रः भवन्ति। ताः सात्वती, भारती, आरभटी, कैशिकी इति च कथ्यन्ते। नाट्यदर्पणानुसारेण नाट्यमातरः नाट्यस्य अभिनेय-काव्यस्य मातरः इव मातरः। आभ्यो हि वर्णनीयत्वेन हृदये व्यवस्थिताभ्यः काव्यम् उत्पद्यते।'

**'भारती सात्त्वती चैव कैशिक्यारभटी तथा।**
**चतस्रो वृत्तयो ह्येता यासु नाट्यं प्रतिष्ठितम्'।।**[4]

रामचन्द्रस्य विचारानुसारेण नाट्यप्रसङ्गे भरतकृतं वृत्तिनिरूपणम् उपलक्षणमात्रमस्ति। यतोहि वृत्तिः चेष्टारूपा इति। अत एव अभिनययोग्यकाव्यस्य इव अभिनयहीनकाव्ये अपि वृत्त्याः सत्ता उपस्थिता भवति। नाट्ये निरूपितपात्रस्य भावभंगिमातुल्यं काव्ये निर्दिष्टचेष्टायाः वर्णनमपि वृत्तिरूपमस्ति।

इत्थं वृत्त्याः क्षेत्रं व्यापकं विस्तारपूर्णञ्च अस्ति।

दशरूपककारः धनञ्जयः अपि वृत्तिं व्यापाररूपाम् एव स्वीकृतवान्। धनिकानुसारं वृत्तिः स्वाभाविकरूपेण व्यापारात्मिका अस्ति। भोजराजस्य मतानुसारं चित्तस्य विकास-संक्षेप-संकोचविस्तार-दशायां पात्राणां यः व्यवहारः व्यापारः वर्त्तनं वा भवति सा वृत्तिः कथ्यते।[5]

**'यां विकासेऽथ विक्षेपे संकोचे विस्तरे तथा**
**चेतसो वर्तयित्री स्यात् सा वृत्तिः'**[6]।

मानसिकरूपेण, वाचिकरूपेण कायिकरूपेण च व्यापारः त्रिप्रकारको भवति। मनोव्यवहाररूपा सात्त्वतीवृत्तिः अस्ति। वचोव्यवहाररूपा भारतीवृत्तिः अस्ति। कायिकव्यापाररूपा आरभटी वृत्तिरस्ति। त्रिषु व्यापारेषु कैशिकी वृत्तिः सौन्दर्याधानं कर्तुं समर्था। एतासां वृत्तीनां रसेन सह प्रगाढसम्बन्धः अस्ति। इयमेव वृत्तिः रसानुगुणम् अर्थ-व्यवहारः, अयञ्च आनन्दवर्धनस्य अभिनवगुप्तस्य च मते अर्थवृत्तिः उच्यते। उक्तं च अभिनवभारत्याम् भारती **वाग्वृत्तिः**। मनोव्यापाररूपा सात्त्विकी सात्त्वती। सदिति प्रख्यारूपसंवेदनं तद् यत्रास्ति। तत् सत्त्वं मनः। तस्येयमिति। इयर्ति इति अराः भटाः सोत्साहा अनलसाः तेषाम् आरभटी काव्यवृत्तिः। यत् किंचित् लालित्यं तत् सर्वं कैशिकीविजृम्भितम्।'[7]

**ध्वन्यालोके** च वृत्तिविषये कथितम् -

**'रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः।'**

औचित्यवान् यस्ता एता वृत्तयो द्विविधाः स्थिताः। तत्र रसानुगुण औचित्यवान् वाच्याश्रयो यो व्यवहारस्ता एताः कैशिकाद्याः वृत्तयः।'

काव्यशास्त्रे वृत्तिनाम्ना त्रयाणां तत्त्वानां मीमांसा कृता।

अलङ्काररूपे अनुप्रासा जातौ सा वृत्तिः कथ्यते, यत्र एकमात्रव्यञ्जनस्य एकवारम् अथवा अनेकव्यञ्जनवर्णानाम् अनेकवारं, तस्मिन्नेव स्वरूपे क्रमे च आवृत्तिः भवति। मम्मटस्य अनुसारम् रसानुकूलवर्णानां मनोरमसन्निवेशः इति वृत्त्यनुप्रासः कथ्यते।

उद्भटः अनुप्रासजातीयवर्णानां विशिष्टयोजनां तथा च रुद्रटः समासजातीयपदानां विशिष्टयोजनां वृत्तिम् उक्तवान्। अभिनवगुप्तो लिखति – यत् वर्ण्य-विषयस्य मसृणता-दीप्तिमत्ता-मध्यमतानुसारम् अनुप्रासजात्याः उपनागरिका-परुषा-कोमला वृत्तिः भवति, ग्राम्या चापि इयमुच्यते। शृङ्गारादिकोमल-रसेषु उपनागरिका रौद्रादिकठोररसेषु परुषा। हास्यादिरसेषु च ग्राम्या अथवा कोमला इति पर्यवस्यते। समासयुक्तपदानां संघटना अपि वृत्तिः कथ्यते। एतद्विषये रुद्रटः अपि पांचाली-लाटी-गौडीनाम्नीः तिस्रः वृत्तीः अमन्यत। यस्यां वृत्तौ द्वे अथवा त्रीणि समासयुक्तपदानि भवन्ति सा पाञ्चाली भवति। यस्यां पञ्च अथवा सप्तपदानि सन्ति सा लाटी, एवं यस्याम् आद्यन्तं समस्तपदानि भवन्ति सा गौडी इत्युच्यते।

**आनन्दवर्धनः** अपि व्यापारम् अथवा व्यवहारमेव वृत्तिं मन्यते। रसाद्यनुकूलशब्दस्य उचितप्रयोगः शब्दवृत्तिः कथ्यते। इत्थं सः शब्द-व्यवहारं वृत्तिम् उक्त्वा वामनोक्तस्य 'विशिष्टा पदरचना रीतिः' इति कथनमपि वृत्तौ समाविष्टवान्।

'व्यवहारो हि वृत्तिरित्युच्यते। वाचकाश्रया-श्चोपनागरिकाद्याः वृत्तयः।'[6] मम्मटोऽपि वर्णानां रसानुकूलव्यापारस्य वृत्तिसंज्ञाम् अकरोत्।

शब्दस्य अर्थबोधकव्यापारस्य कारणं शब्दशक्तिः अथवा वृत्तिः कथ्यते।

इत्थम् 'वृत्तिः' इति **अथर्ववेदीयपैप्पलाद**-संहितायाः आरभ्य विभिन्नशास्त्रेषु सामान्यतः व्यवहारव्यापारयोः अर्थे प्रयुक्तः।

**व्याकरणशास्त्रे** वृत्त्याः बहुविधव्याख्या उपलभ्यन्ते। कातन्त्रस्य मतानुसारेण सूत्राणां स्पष्टा संक्षिप्तव्याख्या च वृत्तिः कथ्यते। यास्कस्य **निरुक्ते** दुर्गाचार्यस्य ऋज्वर्था व्याख्या पाणिनेः अष्टाध्याय्याः उपरि जयादित्यस्य 'काशिका' नाम्नी व्याख्या वृत्तिरेव उच्यते। बृहदारण्यकोपनिषदि कठोपनिषदि च शङ्कराचार्यविरचितभाष्यम् अपि वृत्तिरेवोच्यते। इत्थं टीकायै टिप्पण्यै संक्षिप्तव्याख्यायै भाष्याय चापि वृत्तिशब्दस्य विशिष्टप्रयोगः दृग्गोचरी भवति।

पाणिनेः व्याख्यातॄणामनुसारेण कृत्तद्धित-समासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः उच्यन्ते। **पतञ्जलेरनुसारेण** विग्रह-वाक्यार्थकथनमथवा परार्थकथनमिति वृत्तिः अस्ति। अस्य तात्पर्यम् एतद् अस्ति यत् एकार्थस्य अन्तः अन्यनवीनार्थस्य उद्भावनाय गूढशब्दरचना वृत्तिः कथ्यते। एतस्याः गूढार्थं ज्ञातुं विग्रहो भवति। उदाहरणाय 'राजपुरुषः गच्छति' इति अस्मिन् वाक्ये भिन्नार्थकः 'राज' इति

'पुरुष' इति। च शब्द: भिन्न: दृश्यते परन्तु समस्ते 'राजपुरुष:' इति रूपे उभौ शब्दौ सम्मिल्य एकं विशिष्टार्थं बोधयत:। अर्थबोधानुकूला पदपदार्थ-सम्बन्धरूपा शक्ति: वृत्ति: **नागेशमते**। नागेशस्य मते शाब्द-बोधस्य कृते वृत्तिज्ञानम् अपरिहार्यम् अस्ति।[9]

डॉ. अविनाशचन्द्रकृतशब्दवृत्तिविमर्शनामक-ग्रन्थानुसारेण संस्कृतकाव्यशास्त्रे शब्दशक्त्या: सन्दर्भे वृत्तिरिति शब्दस्य प्रथम: प्रयोगकर्ता भटोद्भटोऽस्ति।

शब्दशक्त्या: स्थाने शब्दवृत्तिपदस्य प्रयोक्तार: आचार्या: मुकुलभोजराज: विद्याधर: अप्पय-दीक्षितादयश्च सन्ति। वृत्तिशब्दस्य स्थाने शब्दशक्तिपदस्य प्रयोगकर्तार: महिमभट्ट:, जयदेव: केशवमिश्रादयश्च सन्ति। शाब्दबोधस्य सन्दर्भे वृत्ते: स्थाने शक्तिपदस्य प्रयोग: क्रियते। वृत्ति: एक: सम्बन्धोऽस्ति यस्या: द्वौ सम्बन्धिनौ स्त:।

१. शब्द: २. अर्थ:

कस्यचित् सम्बन्धस्य सम्यग्ज्ञानाय तस्य सम्बन्धिनाम् अपि ज्ञानम् आवश्यकमस्ति। वृत्ति: एक: सम्बन्ध: अस्ति, अत: वृत्त्या: ज्ञानाय सम्बन्धिनां ज्ञानम् आवश्यकमस्ति।

जगति जातिमात्रस्य उत्पत्ते: स्थिते: संहारस्य च आरम्भे य: पदार्थ: सर्वप्रथमं विद्यमानोऽस्ति स: शब्दोऽस्ति। वाणी जन्मना सह-कण्ठात् उद्भवति, एषा श्रवणीया अस्ति। अत: अस्यात्र संज्ञा शब्दोऽप्यस्ति। अन्तर्मनसि उत्पन्नाया: कस्याश्चित् कामनाया: अभिलाषस्य सङ्कल्पस्य च प्रकटीकरणाय शब्दस्य आविर्भाव:।

एतत् शब्दतत्त्वम् समस्तभुवनानि स्वपरिधौ आवेष्टयति। कल-कलनिनादे निर्झरस्य झर-झर नि:सरणे वर्षाया:, स्वने एवं झंझाया:, भ्रमरस्य गुञ्जने, कोकिलस्य पञ्चमालापे, काकस्य कटूक्तौ, गजस्य बृंहिते सिंहस्य गर्जने, धेन्वा: रम्भणे, तुरगस्य हेषिते, रासभस्य उन्नदिते च या स्वर-लहरी प्रकम्पमाना अस्ति सा शब्दोऽस्ति।

शब्दस्य सूक्ष्मरूपं वेदेषु '**वाक्**' इति कथ्यते। वाक्-तत्त्वस्य सर्वव्यापकताया: सम्बन्धे ऋग्वेदे उल्लिखितं यत् वाक्तत्त्वं सहस्रधा व्याप्तम्। द्युलोकभूलोकवत् वाक्तत्त्वमपि सुप्रतिष्ठितमस्ति।

**'सर्वेषां वेदानां वागेवायतनम्'**[10]
**'वाग्वै ब्रह्म च सुब्रह्म च'**[11]
**'वाक्सन्धि: जिह्वासन्धानम्'**[12]
**'यद् वै प्रजापते: परमस्ति वागेव तत्'**[13]

इत्यादिवचनानि वा प्रशंसायामुक्तानि सन्ति। तानि सूक्ष्मशब्दस्य कृते प्रयुक्तानि सन्ति इति प्रतीयते।

- शोधच्छात्र:, व्याकरणविभाग:
ज.रा.रा.सं.वि.वि., जयपुरम्

सन्दर्भा: -

१. सां. का. २८ २. पातञ्जलयोगदर्शनम् १-६
३. ना.शा. १०-४ ४. अभिनवभारती
५. ना.शा. १५२ ६. सरस्वतीकण्ठा. २-३४
७. अभि.भारती २०-२१
८. ध्व.लो. २-३३ वृत्ति:
९. तत्रागृहीतवृत्तिकस्य शाब्दबोधादर्शनात्
१०. बृ.उ. ३-४-११ ११. बृ.उ. ४-१-२
१२. तै.उ. १.४/१/२ १३. श.ब्रा. ५-११-२८

# जगज्जननी त्रिपुरासुन्दरी

❑ शिवराजभट्टः

नेपालदेशस्य बैतडीमण्डलस्य मुख्यकार्यालयाः प्राकृतिकसौन्दर्येण परिपूर्णे गढी नामक स्थाने सन्ति, यत्र नित्यं जनसम्मर्दः दृश्यते। गढीक्षेत्रं न केवलं मण्डलस्य मुख्यालयः अपितु धार्मिक-ऐतिहासिक-प्राकृतिक-पुरातात्त्विकदृष्ट्या अपि महत्त्वपूर्णमस्ति। भारतस्य उत्तराखण्डस्य पिथौरागढमण्डलस्य झूलाघाट नामक आपणस्य समीपस्थः नेपाल-भारत सीमाक्षेत्रतः इदं क्षेत्रम् अष्टादश किलोमीटरदूरम् अस्ति। क्वापि नेपालभारतसीमाक्षेत्रे स्थितं सेतुं लङ्घयित्वा यानेन सुलभतया अत्र आगन्तुं शक्यते। गढ्याः दार्चुलामण्डले स्थितः हिमालयः, भारतस्य उत्तराखण्डस्य पर्वताश्च मनमोहकरूपेण-समीपस्था इह दृश्यन्ते।

अत्र मण्डलस्य दशरथ-चन्दनगरपालिका मध्ये '**पुजरगउँ**' नामक ग्रामे प्रसिद्धं सुन्दरं त्रिपुरासुन्दरी मन्दिरम् अपि दुर्गस्य महत्त्वं प्रतिबिम्बयति, यत्र जगज्जननी महामाया विश्वेश्वरी जगद्धात्री त्रिपुरासुन्दरी भगवती शक्तिरूपिणी पुरा कालात् राजते। सर्वेश्वर्याः परमश्रद्धया दर्शनात् सर्वाणि पापानि स्खलितानि भवन्ति दीर्घायुष्यं लभ्यते मनोरथाः पूर्णाः जायन्ते, दुष्टानां संहारो भवतीति हिन्दवः भक्तजनाः विश्वासं कुर्वन्ति। विशेषधार्मिक-महोत्सवसमये नेपालस्य बहुभ्यः स्थानेभ्यः एवं भारतस्य उत्तराखण्डात् अस्मिन् पुण्यक्षेत्रे भगवत्याः पूजामर्चनां प्रार्थनां च कर्तुं सनातनीहिन्दवः साधुसंन्यासि-सन्तजनाः अत्र समागच्छन्ति। पुरा कालात् नेपालभारतयोः देशयोः जनानां त्रिपुरासुन्दर्याः मन्दिरस्य विषये अटलविश्वासः वर्तते।

विशेषमहोत्सववेलायां मेलासमये वा भगवत्याः मूर्तिम् सुवर्णरजतैः अलङ्कृतां शिबिकां आरुह्य कुसुमस्तबकैः वर्षयन्तं जयशब्दघोषैः सुमङ्गलैः ब्रह्मघोषैः शंखनादैः सहितम् मन्दिरं प्रति नयन्ति। अस्मिन् दिने शिबिकामारुढायाः भगवत्याः च दर्शनार्थं लक्षाधिकाः जनाः देशदेशात्तत्रागच्छन्ति। अस्मिन् मन्दिरे अर्चनसामग्रीं सज्जीकृत्य वेदघोष-पूर्वकं ब्राह्मणाः पुरोहिताः नित्यपूजार्चनं कुर्वन्ति। तथापि संक्रान्त्यां पूर्णिमायां-नवरात्रौ-शिवचतुर्दश्यां एवं प्रकारेण श्रावणे माघे मासे विशेषपूजार्चनं च क्रियते। त्रिपुरासुन्दरी-मन्दिरस्य विषये द्वयोः देशयोः सांस्कृतिकं धार्मिकं च महत्त्वं समानरूपेण वर्तते, यत् मन्दिरं नेपालदेशे स्थितं किन्तु तत्र आस्थायाः जनसम्मर्दः पूर्णरूपेण पिथौरागढमण्डले अपि दृश्यते। अत्र आयोजिते मेलापकेऽस्य प्रमाणं दृश्यते।

अस्मिन्नवसरे मित्रराष्ट्रात् भारतस्योत्तरखण्डात् चीन देशस्य तिब्बतक्षेत्रात् वाणिज्यार्थमपि केचित् फलकण्डीलं मस्तके स्थापयित्वा, जलकूपिकां स्यूते निधाय चायचषकानि हस्ते गृहीत्वा, मिष्टान्नानि, खाद्यानि वस्तूनि, बालक्रीडनकानि, वस्त्रालंकार-कम्बलानि इत्यादिबहूनि वस्तूनि विक्रेतुमेव बहवो वणिकाः आगच्छन्ति। सीमाक्षेत्रस्य जनानां समाना जीवनपद्धतिः, सभ्यताधार्मिकविश्वाससद्भावः पारिवारिकसम्बन्धः उभयदेशयोः जनानेकसूत्रे बध्नाति। तत्सम्बन्धेन राष्ट्राणां सम्बन्धो सुदृढः भवति।

विशेषमहोत्सवेषु त्रिपुरासुन्दर्या भगवत्याः भण्डारयात्रा '**जात**' भवति, तस्यां यात्रायां भगवत्याः स्वर्णमूर्तिम् (स्थानीयभाषायां 'प्याउलो'कथ्यते) शिबिकाम् आरुह्य **कापडी** नामकं ग्रामस्थितमन्दिरात् एतत् मन्दिरं प्रति आनयन्ति। सनातनी- ब्राह्मणाः भक्तजनाः अस्मिन् अवसरे मन्दिरस्य प्राङ्गणे दुर्गासप्तशती, सरस्वतीस्तोत्रं लक्ष्मीस्तोत्रं, दुर्गा-

स्त्रोत्रं, रुद्राष्टाध्यायी, वेद इत्यादीनां पाठं कुर्वन्ति। अन्ये भक्तजनाः भगवतीं प्रीणयितुं बलि-सामग्रीं सज्जीकृत्य विविधप्रकारेण पूजनं च कुर्वन्ति। अन्ये केचित् परम्परानुसारेण मृदंगादिवाद्यानि वादयन्ति। तद्वाद्यानि कर्णप्रियाणि सुमधुराणि वादनं कृत्वा सुमधुरं वातावरणं कारयित्वा भक्तजनान् मन्त्रमुग्धान् कुर्वन्ति।

त्रिपुरासुन्दरी नेपालदेशस्य सुदूरपश्चिम मण्डलस्य एकं सुप्रसिद्धतमं मन्दिरमस्ति, एतद् आश्चर्यजनकवास्तुसौन्दर्यस्य कृते प्रसिद्धमस्ति, विश्वासस्य, धर्मस्य, संस्कृत्याः, परम्परायाः च प्रतीकरूपेण स्थितमस्ति मन्दिरं पगोडाशैल्याः निर्मितं, रक्तवर्णीयसङ्गमरमरेण अलङ्कृतमस्ति। रक्तवर्णः भगवत्याः प्रतीकः इति मन्यते। त्रिपुरासुन्दरीमन्दिरे भगवत्याः मातुः पूजार्चनं कर्तुम् आशीर्वादं च प्राप्तुं भारतस्य उत्तराखण्डप्रदेशात् लक्षशः जनाः आगच्छन्ति। अत्र पश्चिमनेपालस्य बृहत्तमः मेला लगति। यत्र उभयदेशाभ्याम् लक्षशो जनाः जगज्जननीं महामायां भवानीं त्रिपुरासुन्दरीं भगवतीं समाराधितुम् अत्रागच्छन्ति। मन्दिरस्य विशेषता मन्दिरस्य भित्त्यां त्रिपुरसुन्दरी इत्यस्य शिलामूर्तिः, मन्दिरस्य प्राङ्गणे स्तम्भेषु चामुण्डा-शिवगणेशसिंहपृथिवींधरवराहाणां च मूर्तयः अपि सन्ति। मन्दिरस्य प्राङ्गणे असंख्यैः भक्तैः अर्पितानि घण्टा नेजा ध्वजादीनि मन्दिरं शोभयन्ति। सुदूरपश्चिमाञ्चले प्रायः मन्दिरप्राङ्गणे दोला दृश्यते तथैव अस्मिन् मन्दिरे अपि बृहद्दोला मन्दिरं शोभयति।

त्रिपुरासुन्दर्याः उत्पत्त्याः विषये जनश्रुतिरस्ति भारतस्य उत्तराखण्डराज्यस्य चम्पावत मण्डले मौनी वंश्या क्षत्रियाः ऊषुः। ते बन्धुवर्गेण सार्धं वर्तमानस्य त्रिपुरासुन्दर्याः मन्दिरं परितः आगत्य न्यवसन्। नूतननिवासं उर्वरभूम्यभावः इत्यादि कारणेन, तेषु गृहेषु खाद्यान्नस्य अभावो बभूव। तेषु दिनेषु कालः दूषितः आसीत्, अन्यग्रामात् परैः धान्यमापूर्तिं कृत्वा स्वकुटुम्बस्य भरणपोषणं चक्रुः। तस्मिन्नेव काले **'सारङ्ग'** नामकः कश्चिदेकः दुःखी मौनी खाद्यान्नाभावादन्वेषणार्थं बैतडी मण्डलस्य अन्यतः सोराडं नामकं ग्रामं क्षेत्रं प्रति जगाम। तत्र रोडीदेवलनामकं ग्रामं प्राप्य एकं दिनं तत्र स्थित्वा अपरदिने पञ्च पाथी यवं क्रीत्वा भारमुद्वहन् गृहं प्रतिजगाम । प्रत्यागमनमार्गे यदा नागार्जुनं नामकं स्थाने प्राप्तः सः मलमूत्रोत्सर्गकामो बभूव। एकस्मिन् स्थाने गुरुभारं स्थापयित्वा मलमूत्रोत्सर्गानन्तरं यदा भारं वोढुं प्रवृत्तो बभूव तदा स्फुटाक्षरे गगने वागभूद् यत् त्वमपवित्रो भूत्वा धान्यस्पर्शं कर्तुम् न शक्नोसि। अत्र समीपे जलमस्ति, स्नानं करोतु केवलं शुचि भूत्वा गुरुभारं वह इति। अन्येषु कालेषु जलस्य अभावः भवति परन्तु तस्मिन् दिने जलं वस्तुतः प्राप।

मौनी स्नानं कृत्वा शुचि भूत्वा पुनः गृहं प्रति भारमुदवाह। यदा सायंकाले गृहसमीपे यत्र सम्प्रति त्रिपुर-सुन्दरीमन्दिरम् अस्ति तद् स्थानं प्राप्तः तदा अपरा स्फुटाक्षरे वागभूद्' भारम् अत्र संस्थाप्य त्वं गृहं गच्छ, तव गृहे अद्य प्रभृति समृद्धिः भविष्यति धनधान्याभावो न भविष्यति। अपरमेकं कार्यमपि कुरु, ग्रामं गत्वा ग्रामस्य मुख्यजनान् आह्वयतु अत्राहमस्मि इति वदतु। तम् अनुसृत्य मौनी भारं तत्रैव संस्थाप्य ग्रामस्य प्रसिद्धां व्यक्तिं **भट्टकाजीं** सर्वां घटनां विस्तरेण कथयाञ्चकार। तदाकर्ण्य भट्टकाजी तस्य वचनं न विश्वसिति। कश्चित् प्रेत एव भवितुं शक्यते इति चिन्तयित्वा किमपि न चकार। तदा सः मौनी पुनः यत्र भारं त्यक्तवान् तत्र आगतः, तदा भारः स्वयं उक्तवान् - भट्टकाजीं पुनः एकवारं स्मारयतु आह्वयतु यदि सः न आगच्छति तर्हि अहं तं दण्डयिष्यामि, श्वः तस्य महिष्यः व्याघ्रबध्यत्वात् नष्टाः भविष्यन्ति इति। परन्तु पुनरपि मौनी भट्टसमीपं न जगाम। सः महिषीः यत्र स्थाने संस्थापयाञ्चकार तत्र व्याघ्रस्य आक्रमणं भवितुं न शक्यते। अपरदिवसे तत्स्थानेऽपि व्याघ्र आगतः। तं दृष्ट्वा भयात् धावमानाः द्वाविंशतिः महिष्यः समीपात् पर्वतात्

पतित्वा ममृ:- इत्याकर्ण्य दु:खम् अनुभूय बिभ्यत् भट्टः क्षमायाचनाय द्रुतं भारसमीपं जगाम, तत्र क्षमायाचनापश्चात् पुनः वागभूद्यदि भवान् प्रथमवारं आगमिष्यत् तर्हि अहं भवन्तं सम्मृद्धं अकरिष्यम् परन्तु अद्य त्वामहं दण्डयामि। मम यात्राया उत्सवे मम शिविकां सेवकभावेन मौनी क्षत्रियन्न पुरतः वहिष्यति, त्वं ब्राह्मणः भूत्वापि शिबिकावाहक-रूपेण तस्यानुसरणं कृत्वा शिविकापृष्ठभागं वहतु।

अस्या वचनम् अनुसृत्य त्रिपुरासुन्दरी-मेलायां पर्ववेलायां वा कश्यपगोत्रीयाः भट्टब्राह्मणाः पृष्ठतः शिबिकां वहन्ति, यत् प्रचलनम् अद्यपर्यन्तं तथैव अस्ति। यदा मौनी यवपुटं उद्घाटितवान् तदा तस्मिन् भारे भगवत्याः प्रतिमां प्राप। स्थानीयभाषायां पञ्चपाथि परिमाणं '**रण्या**' इति कथ्यते, पञ्चपाथि यवभारे निगूढा आगतवती इति कारणतः त्रिपुरसुन्दरी 'रैणासैनी' 'रणासैनी' वा नाम्ना ख्याता अभवदिति विश्वासः। तस्मिन् स्थले यवः बृहच्छिलारूपेण परिणतः बभूव, पश्चात् स्थानीयाः धार्मिकाः जनाः तस्मिन् स्थाने मन्दिरं निर्मापयामासुः। भगवत्याः वास्तविकमूर्तिः तु भण्डारे स्थापिता भवति।

सा जगदम्बा भवानी अपृथक्त्वेऽपि शक्तिभ्यः पार्वती रमा लक्ष्मीः कालिका मालिका मूलनारायणी त्रिपुरासुन्दरी इत्याद्यनन्तनामभिः रूपभिः पृथक्त्वेनेव वर्तते। एकामपि तां जनाः पृथक् स्थाने पृथक् रूपेण पृथक् नामभिः पूजयन्ति। तस्या पूजार्चनं मुमुक्षूणामजिह्मा राजपद्धतिः भवति। त्रिपुरासुन्दरी-विषये स्कन्दपुराणे चतुरशीतितमेऽध्याये वर्णनमस्ति-

**'यमाराध्य महाभागः सुग्रीवो नाम वानरः।**
**प्राप्तवान् दुर्लभं राज्यं बालिना परिपालितम्।।'**

तत् कथमभवदिति एवं मानवाः कथं परां सिद्धिं यान्तीति विषये तत्र वर्णनमस्ति। आदौ ब्रह्मणः पौत्रौ भगवद्- भक्तिपरायणौ महाबलौ सत्यमार्गरतौ शान्तौ सर्वविद्याविशारदौ बालि-सुग्रीवौ भ्रातरौ द्वौ वानरौ बभूवतुः। ब्रह्मणः आदेशेन सर्वसौभाग्यवता विश्वकर्मणा निर्मिता दिव्यनगरी किष्किन्धा यत्र वीरो बाली राजा बभूव सप्तद्वीपगता दुर्जयाः वानराः सर्वे हरिराजस्य वशगाः बभूवुः। तदा सुग्रीवः सर्वगुण- सम्पन्नां तारां नवोढां सुकुमाराङ्गीं साक्षात् लक्ष्मी इव पत्नीं प्राप।

बाली कदाचित् रूपयौवनशालिनीं रतीमिव तारां ददर्श। तां दृष्ट्वा बाली मोहमापन्नः मन्मथेन प्रपीडितः तां जहार। इन्द्रसूनुर्दुर्मतिः सुग्रीववधे मतिं प्रचक्रे। सुग्रीवोऽपि मन्त्रिमुख्यानां मतं पप्रच्छ। तेषां मन्त्रमनुसृत्य रविसूनुः अपि बलवद्भिः वानरैः सार्धं पलायितः। ते बालिभयसंत्रस्ता अस्मिन् पुण्यभूमौ आगता यत्र महादेवस्य वल्लभा त्रिपुरासुन्दरी भक्तैश्च सेविता मूलनारायणी नाम्ना नागकन्यानिषे-विता आसीत्। सः हनुमता सार्धं विधिवत् भक्तिभावेन तस्याः पूजाञ्चकार। बहुभ्यः वर्षेभ्यः पश्चात् कदाचित् सा देवी तत्र सुग्रीवस्य पुरतः आविर्बभूव। तत्सपर्यया प्रसादिता सापि उवाच ह-मनोऽभिलषितं वरं याचस्व। तदा सुग्रीवो 'वने बालिनं हत्वा तारां राज्यं च देहि' इति अयाचत। तदा त्रिपुरासुन्दरी आह बाली अपि त्वद्वधार्थाय साम्प्रतं रामसरितोर्मध्ये बालीश्वरं हरं प्रसादयितुं तपस्तपति परन्तु मम प्रसादात् तस्य तपः सफलं न भविष्यति। त्वं रघुनायकस्य साहाय्यं प्राप्स्यसे त्वयापि तस्य साहाय्यं कर्तव्यम्। राघवः बालिनं निहत्य तुभ्यं वानराणां राज्यं दास्यति। मम प्रभावाद् रघुनायक अनुजेन सह स्वयं तव गृहे समायास्यति। तदा सा भगवती तत्रैवान्तरधीयत। सुग्रीवोऽपि प्रहृष्टवदनो भूत्वा स्वगृहं ययौ। एकदा हनुमान् रामं सुग्रीवं च परस्परं मित्रं चकार। रामः बालिनं हतवान् च। बालिनं हत्वा किष्किन्धां कपिराज्यं तारां च सुग्रीवाय समर्पयाञ्चकार। एवं प्रकारेण त्रिपुरासुन्दरी- महिमा स्कन्दपुराणे मानसखण्डे वर्णितोस्ति।

- सूचनाप्रविधिनिर्देशकः, **नेपालसर्वकारः**, नापी-
विभागः, **काठमाण्डौः**] नेपालम्

नारी-स्तम्भः

# अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः

❑ डॉ. राजेश्वरी भट्टः

**अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः**
**जाया पत्ये मधुमती वाचं वदतु शान्ति वाम्।**
**मा भ्राता भ्रातरं द्विषन् मा स्वसारमुत स्वसा**
**सम्यञ्च सुव्रतो भूत्वा वाचं वदतु भद्रया।।**

– अथर्ववेदः, 30/23

संयुक्तपरिवारेषु सुखं शान्तिं समरसतामखण्डताञ्च स्थापयितुं घटे सागरमिव विराडर्थं समुद्घाटयत्सु वैदिकमन्त्रेष्वेषु निर्दिष्टायाः संयुक्तपरिवारस्य सदाचारसंहितायाः लोके महतीमुपयोगितामनिवार्यताञ्चाऽनुभूय महर्षिणा वाल्मीकिना रामायणमहाकाव्ये मर्यादापुरुषोत्तमस्य रामस्य परिवारसदस्यानाम् आदर्शचरित्रमाध्यमेन संयुक्तपरिवाराणाम् अखण्डतायाः समरसतायाः रहस्यमुद्घाटितम्। रामपरिवारस्य सर्वे सदस्या अहमहमिकया वृत्त्या परस्परं समर्पणभावेन त्यागेन, कर्तव्यबोधेन च व्यवहरन्तो धन्यतरान् आत्मनः मन्यन्ते। महाकाव्यस्य प्रारम्भे पुत्राणां भाविजीवनस्योत्कर्षाय तेषां योगक्षेमार्थञ्च पिता सावहितः संलग्नश्च दृश्यते। एवमेव पितुः छत्रच्छायायां वर्धमानाः प्रशिक्षिता चत्वारः पुत्राः पितुराज्ञापालने शुश्रूषणे च पूर्णतः परिनिष्ठिताः सन्ति। तथापि तेषां चतुर्णां मध्ये सत्यनिष्ठस्तेजस्वी धनुर्विद्याविशारदो रामः पितरं प्रति सर्वथा समर्पितः सेवायाञ्च निरत आसीत्। कथितञ्च –

**सर्वेऽपि ज्ञानसम्पन्नाः सर्वे समुदिता गुणैः**
**तेषामपि महातेजो रामः सत्यपराक्रमः।।**
**धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः।**

– वा.रा./बाल/15/26, 26.27

पितरं प्रति रामस्येयं निष्ठा प्रतिकूलतां प्राप्यापि मनागपि विचलिता न जाता। एकतोऽयोध्यायां रामस्य राज्याभिषेकमहोत्सवकृतेऽपूर्व उत्साह आसीत् अपरतः कैकेय्या कुबुद्ध्या, पितुरादेशेन, चतुर्दशवर्षाणां कृते वने निवासः। अविश्वसनीयम् अकल्पनीयं चेदमासीत्। किन्तु वज्रादपि कठोरमादेशं श्रुत्वाऽपि पितृभक्तो रामः कथमपि उन्मना नाऽभवत्। पितृभक्तस्य रामस्य कृते पितृसेवा, पितुराज्ञापालनादतिरिक्तं महत्तरं किमपि नासीत्। कथितञ्च –

**न ह्यतो धर्माचरणं किञ्चिदस्ति महत्तरम्।**
**यथा पितरि शुश्रूषा तस्य वा वचनक्रिया।।**

पितुराज्ञापालने यथा रामोऽतितरं सुखमन्वभवत् तथैव मातुराज्ञाऽपि रामस्य कृते ब्रह्मवाक्यमिव शिरोधार्याऽऽसीत्। 'मातृदेवो भव' इति भावनया भरितस्य रामस्य व्यवहारस्तिसृणां मातॄणां कृते हृदयानन्दकारक आसीत्। विमात्रा कैकेय्या विहितं अन्यायपूर्णं व्यवहारं विधेर्विधानं मत्वा रामो न केवलं यथा तथैव अक्षरशः स्वीकृतवान् अपितु कैकेय्या विहितेन अन्यायेन विप्रकृतं, रोषेण दह्यमानं भ्रातरं भरतमपि कैकेयीं प्रति क्रोधान्न्यवारयत्। कथितञ्च –

**मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति।**
**मया च सीतया चैव शप्तोऽसि रघुनन्दन।।**

– वा. रा. अयो. 112/27

रामायणमहाकाव्ये आदर्शदाम्पत्यजीवनस्य लोकोत्तरं चित्रणं प्राप्यते। आदर्शदम्पतीरूपेण चित्रितौ सीतारामौ श्रद्धाविश्वासयोः प्रतीकौ अन्योन्यस्य पूरकौ च

दृश्येते। प्रासादादुटजपर्यन्तं परस्परम् अन्योन्यं भावयन्तौ, सर्वास्ववस्थासु सुखं सन्तोषमन्वभवन्तौ सीतारामौ आनन्देन सुखेन च न्यवसताम्। रामस्य वनगमनसमये जनैः भूयो भूयो वार्यमाणाऽपि रामेण सह वनगमनायोद्यताया, रामेण विना प्राणांस्त्यक्तुं दृढसंकल्पवत्याः सीतायाः पतिप्रेम्णः पराकाष्ठा युगयुगेभ्य दाम्पत्यजीवनस्य कृते अनुकरणीय आदर्शो वर्तते। कथितञ्च (वा. अयो. 27.23) –

**अनन्यभावामनुरक्तचेतसं**
**त्वया वियुक्तां मरणाय निश्चिताम्।**
**नयस्व मां साधु कुरुष्व याचनां**
**नातो मया ते गुरुता भविष्यति।।**

रामायणे वर्णिताः परिवारस्य सर्वे सम्बन्धाः परस्पर त्यागेन समर्पणेन संसिक्ताः दृश्यन्ते। अत्र वर्णितो भ्रातृभावो युगयुगेभ्योऽनुकरणीयोऽस्ति। रामेण सह चतुर्दशवर्षाणि यावत् सेवकभावेन सीतारामयो रक्षार्थं रात्रिजागरणं कुर्वतो लक्ष्मणस्य भ्रातृभक्तिरनन्या अगम्या च वर्तते। एवमेव अयोध्याया आधिपत्यं प्राप्यापि ज्येष्ठभ्रातुः पादुके सिंहासने निक्षिप्य स्वयं दासभावेन चतुर्दशवर्षाणि यापयतो भरतस्य त्यागः अलौकिकोऽस्ति। रामायणमहाकाव्ये महर्षिवाल्मीकिना महता चिन्तनेन मननेन दर्शनेन च प्रस्तुत आदर्शपारिवारिकसम्बन्धानां भव्योऽयं प्रासादः भारतीयैः अपसंस्कृत्या पदक्रमेण संरक्षणीयः।

## हिन्दी अनुवाद

**पुत्र पिता का आज्ञाकारी हो तथा माता को प्रसन्न रखे। पत्नी पति से मधुर वाणी में व्यवहार करे। भाई भाई से कभी द्वेष न करे तथा बहिन भी बहिन के प्रति कल्याण की कामना करे।** – अथर्ववेद, 30/2/3

संयुक्त परिवारों में सुख, शान्ति एवं समरसता तथा अखण्डता स्थापित करने के लिए गागर में सागर की भांति विराट् अर्थ का प्रतिपादन करने वाले वैदिक मन्त्रों में निर्दिष्ट संयुक्त परिवार की सदाचार संहिता की लोक में महती उपयोगिता एवं अनिवार्यता का अनुभव कर महर्षि वाल्मीकि के द्वारा रामायण महाकाव्य में मर्यादापुरुषोत्तम राम के परिवार के सदस्यों के आदर्श चरित्र के माध्यम से संयुक्त परिवारों की अखण्डता एवं समरसता का रहस्य उद्घाटित किया गया है। राम परिवार के सभी सदस्य पहले मैं, पहले मैं– इस उदार भावना से परस्पर समर्पण एवं त्यागबुद्धि से तथा कर्त्तव्यबोध से परस्पर व्यवहार करते हुए अपने को धन्यतर मानते हैं। महाकाव्य के प्रारम्भ में पुत्रों के भावी जीवन के उत्कर्ष एवं योगक्षेम के लिए पिता अत्यन्त सावधान एवं संलग्न दिखाई देते हैं। इसी तरह पिता की छत्रछाया में बढ़ते हुए प्रशिक्षित चारों पुत्र भी पिता की आज्ञापालन एवं सेवा में तत्पर हैं। तथापि उन चारों में भी सत्यप्रतिज्ञ तेजस्वी धनुर्विद्या-विशारद राम पिता की सेवा में सर्वदा एवं सर्वथा समर्पित हैं। पिता के प्रति पितृभक्त राम की अपूर्व निष्ठा प्रतिकूल परिस्थितियों में भी तनिक भी विचलित नहीं हुई। अयोध्या में एक ओर राम के राज्याभिषेक महोत्सव की अपूर्व तैयारियां हो रही थीं, वहीं दूसरी ओर कैकेयी की कुबुद्धि एवं दशरथ के आदेश से राम के लिए 'चौदह वर्ष का वनवास' इस अविश्वसनीय एवं अकल्पनीय एवं वज्र से भी कठोर समाचार को सुनकर भी पितृभक्त राम तनिक भी विचलित नहीं हुए। पितृभक्त राम के लिए पिता की सेवा एवं आज्ञापालन से बढ़कर संसार में कुछ भी नहीं है। पिता की आज्ञापालन करने में राम जितने सुख का अनुभव करते हैं माता कैकेयी की आज्ञा को भी उसी प्रकार ब्रह्मवाक्य समझकर स्वीकार करते हैं।

'मातृदेवो भव इसी भावना से युक्त राम का व्यवहार अपनी तीनों माताओं के लिए अनुकूल एवं हृदयानन्दकारक है। विमाता कैकेयी द्वारा किए गये अन्यायपूर्ण व्यवहार को विधि का विधान मानकर न केवल माता के आदेश को अक्षरशः स्वीकार किया अपितु कैकेयी के अनुचित व्यवहार से उन्मना एवं क्रोध से जलते हुए भाई भरत को भी शान्त करने का कार्य किया।

रामायण महाकाव्य में आदर्श दाम्पत्य जीवन का लोकोत्तरस्वरूप प्राप्त होता है। आदर्श दम्पती के रूप में चित्रित राम और सीता श्रद्धा एवं विश्वास के प्रतीक तथा परस्पर एक-दूसरे के पूरक हैं। महल से कुटिया तक एक-दूसरे को प्रसन्न रखते हुए सभी अवस्थाओं एवं परिस्थितियों में सुख एवं सन्तोष का अनुभव करते हुए सीता और राम आनन्द एवं सुख से दाम्पत्य जीवन को धन्य कर रहे थे। राम के वन-गमन के समय परिवारजनों के द्वारा बारम्बार रोके जाने पर भी राम के साथ वन जाने के लिए उद्यत, राम के बिना प्राणों को त्याग करने के लिए दृढ़संकल्पवती सीता का त्याग और पतिप्रेम युगों युगों तक आदर्श दम्पती के लिए अनुकरणीय है। रामायण में वर्णित सभी पारिवारिक सम्बन्ध परस्पर त्याग एवं समर्पण से संसिक्त हैं। रामायण में वर्णित भ्रातृप्रेम युग-युग तक अनुकरणीय है। राम के साथ चौदह वर्ष पर्यन्त सेवकभाव से राम और सीता की रक्षा के लिए रात भर जागरण करने वाले भाई लक्ष्मण की भ्रातृभक्ति अनन्या एवं अगम्या है। इसी प्रकार अयोध्या का राज्य प्राप्त करने पर भी ज्येष्ठ भ्राता राम की पादुकाओं को सिंहासन पर रखकर स्वयं दासभाव से चौदह वर्ष व्यतीत करने वाले भरत का त्याग अलौकिक है। रामायण महाकाव्य में महर्षि वाल्मीकि के द्वारा अपने गहन चिन्तन, मनन एवं दर्शन से प्रस्तुत आदर्श पारिवारिक सम्बन्धों का यह भव्य प्रासाद भारतीयों के द्वारा अपसंस्कृति के प्रवेश से संरक्षणीय है।

- पूर्व विभागाध्यक्षा (संस्कृतविभागे)
लालबहादुरशास्त्रीकॉलेजः, तिलकनगरम्,
जयपुरम्।

## पाठक-प्रतिक्रिया

संस्कृतजगतः सुप्रसिद्धा संस्कृतमासपत्रिका **'भारती'** नित्यमेव हृदयमनुरञ्जयति। १९५० ईशवीतोऽनवरतं प्रकाशमाना प्राचीनतमा पत्रिकैषा पत्रकारता-क्षेत्रे संस्कृतस्य कीर्तिध्वजं प्रख्यापयति। पञ्चसप्ततिवर्षतोऽनवरतरूपेण प्रकाशमानाया अस्याः कौस्तुभजयन्तीवर्षोऽयम् इति मनः मोमुद्यते। अस्याः कौस्तुभजयन्तीविशेषाङ्कः सुविशिष्टो मनोहरश्च। प्रकाण्डविदुषः ज्ञानविज्ञाननिधेः प्रोफेसर **श्रीकृष्णशर्मा**गुरुवर्यस्य सम्पादने अंकोऽयं कौस्तुभमिवैव। हार्दं वर्धापनं गुरुवर्यान् शर्मामहाभागान् प्रति विशेषाङ्कस्य प्रकाशनार्थम्। अंकेऽस्मिन् प्रकाशिताः प्रशस्या आलेखाः विशेषाङ्कस्य वैभवं सूचयन्ति। निःसन्देहम् संस्कृतविदुषां प्राणस्वरूपेयं 'भारती' भारती एव।

**- डॉ. अञ्जना शर्मा**
एसोशियेट प्रोफेसर, संस्कृतविभागः,
वनस्थली विद्यापीठम्।

आयुर्वेद-स्तम्भः

# दोषधातुप्रदूषको हि विरुद्धाहारः

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**रसादयः देहधातवो वातपित्तकफादयश्च दोषाः यदा स्वस्थानस्थिताः नियते हि स्वमाने प्रतिष्ठिताः भवन्ति, तदा शरीरं निरामयां स्थितिमुपैति। यदा तु केचन द्रव्यप्रकाराः तेषां धातूनां स्वभाव-प्रकृतिस्थितेः विपरीतभावेनोपतिष्ठन्ति, तदा विरुद्धाः हि ते धातून् दूषयित्वा धातुवैषम्यं जनयन्ति, वैषम्यादेव रोगप्रादुर्भावः। अत एव दोषधातुप्रदूषको हि विरुद्धाहारः धातुवैषम्यस्य प्रमुखं कारणं भवतीति कथयन्त्यायुर्वेदाचार्याः।**

रसादि देहधातु तथा वात, पित्त, कफ आदि दोष जब अपने-अपने स्थान पर स्थित होकर निश्चित रूप से अपनी मात्रा में स्थिर रहते हैं, तब शरीर निरामय अवस्था को प्राप्त करता है। परन्तु जब कुछ द्रव्य-प्रकार उन धातुओं की स्वभावगत प्रकृति एवं स्थिति के विपरीत प्रभाव से संयोग करते हैं, तब वे निस्संदेह विरुद्ध होकर धातुओं को दूषित करते हैं और धातुवैषम्य उत्पन्न करते हैं। इसी वैषम्य से रोगों का प्रादुर्भाव होता है। इसीलिए आयुर्वेदाचार्य कहते हैं कि दोष-धातुओं को दूषित करने वाला विरुद्धाहार ही धातुवैषम्य का प्रमुख कारण होता है।

**विरुद्धता तु बहुविधैः कारणैर्जायते शरीरे, विशेषेण तु परस्परगुणविरुद्धता, संयोगसंस्कारपरिणामविरुद्धता च धातुवैषम्योत्पादिका। एतदतिरिक्तं यदा त्वाहारे देशकालमात्रानुरूपता न भवति तदापि विरुद्धतामुपयात्याहारः। तत्रापि च दोषप्रकृतिविशेषयोरनुकूल एवाहारः श्रेष्ठो भवतीति मन्यन्ते तज्ज्ञाः, परस्परविरुद्धवीर्याणां विरुद्धगुणात्मकानाञ्च द्रव्याणामपि सहोपयोगः विरुद्धपरिणामात्मको भवति।**

शरीर में विरुद्धता तो अनेक प्रकार के कारणों से उत्पन्न होती है, विशेष रूप से परस्पर गुणों की विरुद्धता तथा संयोग, संस्कार और परिणाम की विरुद्धता धातुवैषम्य उत्पन्न करने वाली होती है। इसके अतिरिक्त जब आहार देश, काल और मात्रा के अनुरूप नहीं होता, तब भी आहार विरुद्धता को प्राप्त होता है। इसमें भी दोषों और प्रकृति के विशेष के अनुसार जो आहार अनुकूल होता है, वही श्रेष्ठ माना जाता है-यह विद्वान् लोग मानते हैं। परस्पर विरुद्ध वीर्य वाले तथा विरुद्ध गुणों से युक्त द्रव्यों का सह-उपयोग भी विरुद्ध परिणाम देने वाला होता है।

**किञ्चिद् द्रव्यं गुणविरोधात् प्रतिकूलं भवति, यथा मत्स्यपयसोः संयोगः। पृथगुपयुज्यमानयोः तयोरहितताप्रसङ्गो न दृश्यते, संयोगविशेषे तु तयोः गुणाः परस्परं नानुकूलतां प्रदर्शयन्ति, तेन हि विरुद्धफलमवश्यं भवति। अन्यत्र संयोग एव दोषहेतुर्भवति, यथा निकुचस्य माषैः सह भोजनम्; तत्र न संस्कारपरिणामः कारणम्, नापि द्रव्यस्वभावपरिवर्तनम्, केवलं सहोपयोग-विशेष एव प्रतिकूलतां जनयति।**

कुछ द्रव्य गुणों के विरोध के कारण प्रतिकूल हो जाते हैं, जैसे मछली और दूध का संयोग। दोनों को पृथक्-पृथक् प्रयुक्त करने पर उनकी कोई अहितता नहीं दिखाई देती, परन्तु विशेष संयोग में उनके गुण परस्पर अनुकूलता नहीं दिखाते, इसलिए निश्चय ही विरुद्ध परिणाम उत्पन्न होता है। अन्यत्र केवल संयोग ही दोष का कारण बनता है, जैसे निकुच का माष

(उडद) के साथ भोजन करना; वहाँ न संस्कार या परिणाम कारण है और न ही द्रव्य के स्वभाव में कोई परिवर्तन, केवल विशेष सह-उपयोग ही प्रतिकूलता उत्पन्न करता है।

**केचन द्रव्यप्रकारा संस्कारपरिणामेन स्वीयं गुणं परित्यज्य विरुद्धत्वमापद्यन्ते; यथा सर्षपतैल-भृष्टकपोतभक्षणम्, यत्र सर्षपतैलस्य तीक्ष्णता संस्कारेण मांसगुणान् विक्षोभयति।**

**देशनिमित्तमपि विरुद्धत्वं दृश्यते। भूमेः स्वभावः, आहारद्रव्यस्य मूलगुणाः, पशुवृत्तेः प्रकारः–एतेषां वैषम्यात् द्रव्यं देशविरुद्धं भवति; तथा शरीरस्य दोषावस्था, अग्निबलम्, ऋतुसम्बन्धः–एभिः शरीरे विरुद्धत्वं जायते।**

कुछ द्रव्य-प्रकार संस्कार और परिणाम के कारण अपने गुणों को छोड़कर विरुद्ध हो जाते हैं; जैसे सरसों के तेल में भुना हुआ कपोत (कबूतर) खाना, जहाँ सरसों के तेल की तीक्ष्णता संस्कार के द्वारा मांस के गुणों को विक्षुब्ध करती है देश के कारण भी विरुद्धता देखी जाती है। भूमि का स्वभाव, आहार-द्रव्य के मूल गुण, पशु की वृत्ति–इनके वैषम्य से द्रव्य देश-विरुद्ध हो जाता है और शरीर के दोषों की अवस्था, अग्नि का बल और ऋतु का सम्बन्ध–इनसे भी शरीर में विरुद्धता उत्पन्न होती है ।

**एतदतिरिक्तमुष्णक्लान्तस्य मधुपानं प्राणान्तकं भवति। कालस्याप्यननुकूलता द्रव्ये वैपरीत्यमापादयति, यथा पर्युषिता काकमाची मरणहेतुत्वेनोक्ता, यद्यप्येषः प्रयोगो न हि सद्यो मारकः पुनरपि हानिकारकस्तु भवत्येव, पुनः पुनः प्रयोगेण च मरणं प्रति नयत्येव। एवमेवाहारौषधद्रव्याणां मात्रामतिक्रम्य प्रयोगोऽपि हानिकारक एव।**

इसके अतिरिक्त उष्णता से क्लान्त व्यक्ति के लिए मधु (शहद) का पान प्राणान्तक हो जाता है। काल की अनुपयुक्तता भी द्रव्य में वैपरीत्य उत्पन्न करती है, जैसे बासी काकमाची को मृत्युकारक कहा गया है; यद्यपि यह प्रयोग तत्काल घातक नहीं होता, फिर भी हानिकारक अवश्य होता है और बार-बार प्रयोग करने से मृत्यु तक पहुँचा देता है। इसी प्रकार आहार और औषध द्रव्यों का मात्रा से अधिक प्रयोग भी हानिकारक ही होता है।

**केषाञ्चिद्द्रव्याणां सममात्रात्मको प्रयोगो विरुद्धतामुपयाति, यथा मधुसर्पिषी समधृते, मधु वारि चान्तरिक्षं समधृतं विरुद्धं भवति, एवमेव मधु पुष्करबीजं, मधु पीत्वोष्णोदकं, भल्लातकोष्णोदकं, तक्रसिद्धः कम्पिल्लकः, पर्युषिता काकमाची, अङ्गारशूल्यो भासश्चेति विरुद्धानि।**

कुछ द्रव्यों का समान मात्रा में प्रयोग करना भी विरुद्धता उत्पन्न करता है, जैसे मधु और घृत का सममात्रा में सेवन, मधु और आकाशीय जल का समरूप मिश्रण विरुद्ध होता है। इसी प्रकार मधु एवं पुष्करबीज, मधु के बाद उष्ण जल पीना, भल्लातक के साथ उष्ण जल, तक्र में सिद्ध कम्पिल्लक, बासी काकमाची, भास पक्षी का अङ्गारों में शूल (काँटे) में पिरोकर भूना हुआ मांस आदि विरुद्ध माने गए हैं।

**स्वभावविरुद्धं तु यत्, तत्तद्रस्तु न संस्कारेण न संयोगवशात्, किं तु नैसर्गिकतया एव हानिकारकं, यथा विषं। एवं नानाप्रकारकारण-संश्रितं द्रव्यधातुविरोधं यदा यथावत् परीक्ष्यते, तदा स्पष्टं दृश्यते यत् युक्ताहारविहारपालनमेव स्वास्थ्यस्थापनस्य मूलतत्त्वं, तथा धातुसाम्यरक्ष-णस्य प्रमुखोपायः। अतः आहारविहारयोजना दोषधात्वनुरूपिण्येव भवेत्, विरुद्धद्रव्यप्रयोगो सममानस्थितानामपि धातूनां वैषम्यं जनयेदिति**

नितराम् अवधारणीयम्।

जो स्वभाव से विरुद्ध होता है, वह न तो संस्कार के कारण और न ही संयोग के कारण, अपितु अपनी नैसर्गिक प्रकृति से ही हानिकारक होता है, जैसे विष इस प्रकार जब द्रव्यों और धातुओं के बीच होने वाले विभिन्न कारणों पर आधारित विरोध को ठीक से परखा जाता है, तब स्पष्ट दिखाई देता है कि उचित आहार-विहार का पालन ही स्वास्थ्यस्थापना का मूल तत्त्व है और धातु-साम्य की रक्षा का प्रमुख उपाय भी है। अतः आहार-विहार की योजना दोषों और धातुओं के अनुरूप ही होनी चाहिए, क्योंकि विरुद्ध द्रव्यों का प्रयोग समान अवस्था में स्थित धातुओं में भी वैषम्य उत्पन्न कर सकता है-यह बात भली-भाँति समझ लेने योग्य है।

**संस्कारेण दोषपरिहारः-**

**अन्यस्मिन् प्रसङ्गे चक्रपाणिः स्पष्टयति यत्, विरुद्धद्रव्यमप्युपयुक्तसंस्कारानन्तरमथवोपयुक्तद्रव्यान्तरसंयोगेन यदा प्रयुज्यते, तदा तस्य द्रव्यस्य विरुद्धत्वस्यापनयनं भवति। आचार्यश्चरकः संस्कारं करणशब्देन सम्बोधयति कथयति च यद्विभिन्नैः संस्कारैः द्रव्येषु गुणान्तराधानं भवति, तेन हि द्रव्यस्य दोषस्यापनयनञ्चापि भवति। कदाचिच्च संस्कारेण गुणपरिवर्तनमपिभवति द्रव्याणामाहारकल्पनानाञ्च।यथा-**

**करणं पुनः स्वाभाविकानां द्रव्याणामभिसंस्कारः।**

**संस्कारो हि गुणान्तराधानमुच्यते।**

**ते गुणास्तोयाग्निसन्निकर्षशौचमन्थनदेशकालवासनभावनादिभिः कालप्रकर्षभाजनादिभिश्चाधीयन्ते ( च.वि. 1/22 )**

संस्कार द्वारा दोष-निवारण-

किसी अन्य प्रसङ्ग में चक्रपाणि स्पष्ट करते हैं कि विरुद्ध द्रव्य भी जब उचित संस्कार के बाद अथवा उपयुक्त द्रव्यों के संयोग से प्रयुक्त होता है, तब उसके विरुद्धत्व का निवारण हो जाता है। आचार्य चरक संस्कार को 'करण' शब्द से सम्बोधित करते हैं और कहते हैं कि विभिन्न संस्कारों से द्रव्यों में गुणों का परिवर्तन हो जाता है, जिससे द्रव्य के दोष का निवारण भी सम्भव होता है। कभी-कभी संस्कार से द्रव्य तथा आहार-कल्पनाओं के गुणों में भी परिवर्तन हो जाता है जैसे-

'करण' स्वाभाविक द्रव्यों का संस्कार है। संस्कार को ही गुणों के परिवर्तन (गुणान्तर की स्थापना) कहा जाता है।वे गुण जल, अग्नि के संपर्क, शौच (शुद्धीकरण), मन्थन, देश, काल, वासना, भावनादि तथा काल की प्रबलता, पात्र आदि से आरोपित (प्राप्त) होते हैं। (चरक संहिता, विवरणस्थान 1/22)

**स्पष्टयति चात्र व्याख्याकारश्चक्रपाणिः, यथा-**

**तोयाग्निसन्निकर्षशौचैस्तण्डुलस्थं गौरवमुपहृत्य लाघवमत्रे क्रियते। यदुक्तं- 'सुधौतः प्रस्नुतः स्विन्नः सन्तप्तश्चौदनो लघुः' ( सू.अ.27 )। तथा रक्तशाल्यादेर्लघोरप्यग्निसंयोगादिना लाघवं वर्धते। मन्थनाद्गुणाधानं यथा 'शोथकृद्दधि शोथघ्नं सस्नेहमपि मन्थनात्' इति। देशेन यथा 'भस्मराशेरधः स्थापयेत्' ( चि.अ.1पा.1 ) इत्यादौ। वासनेन गुणाधानं यथा- अपामुत्पलादिवासनेन सुगन्धानुकरणम्। भावनया च स्वरसादिकृतया स्थितस्यैवामलकादेर्गुणस्योत्कर्षो भवति। कालप्रकर्षाद्यथा- 'पक्षाज्जातरसं पिबेत्' ( च.चि.अ.15 ) इत्यादि। भाजनेन यथा- 'त्रैफलेनायसीं पात्रीं कल्केनालेपयेत्' ( च.**

**चि.अ.1,पा.3) इत्यादौ। आदिग्रहणात् पेषणाभिमन्त्रणादि गृह्यते।(चक्रपाणिः)**

चक्रपाणि यहाँ स्पष्ट करते हैं, जैसे-

जल और अग्नि के संपर्क तथा शौच (शुद्धीकरण) से चावल में स्थित भारीपन को हटाकर भोजन में लाघव (हल्कापन) उत्पन्न किया जाता है; जैसे कहा गया है- 'धोया हुआ, टपकाया हुआ, पकाया हुआ और गरम किया हुआ ओदन (भात) हल्का होता है' (सूत्रस्थान 27)। इसी प्रकार रक्तशालि आदि का हल्कापन भी अग्नि-संयोग आदि से बढ़ जाता है।

मन्थन से गुणों का आधान हो जाता है, जैसे- 'सूजन उत्पन्न करने वाला दही भी स्नेहयुक्त होने पर मन्थन से(मथने से) शोथहर (सूजन घटाने वाला) हो जाता है।'

देश से गुणाधान का उदाहरण-देश से गुणान्तराधान का तात्पर्य है (किसी योग के गुणवर्धन करने के लिए उसे) भस्म-ढेर के नीचे रख देना चाहिए' इत्यादि में।

वासना (सुगंध-संयोग) से गुणों का आधान, जैसे- उत्पल (नीलकमल) आदि की वासना से जल में सुगंध का आ जाना। भावना से गुणों में वृद्धि, जैसे- आमलक आदि पर उसके ही स्वरस आदि द्वारा भावना करने से उसके गुणों का उत्कर्ष होता है। काल-प्रकर्ष का उदाहरण- 'एक पक्ष (पन्द्रह दिन) तक रखे हुए रस को पीना चाहिए' (चिकित्सा 15) इत्यादि। पात्र (भाजन) के कारण गुणाधान, जैसे- 'त्रिफला के कल्क से लोहे की पात्र को लेपित करें' (चिकित्सा 1/3) इत्यादि। 'आदि' शब्द से पेषण और अभिमन्त्रण आदि अन्य संस्कार भी ग्रहण किए जाते हैं।(चक्रपाणि)

**वर्तमानकाले भोजननिर्माणक्रमे प्रयोगक्रमेऽपि च बहवःदोषाः दृश्यन्ते। शीतीकरणयन्त्रेषु दीर्घकालपर्यन्तं निक्षिप्तं भोजनं तच्च शीतं पुनरुष्णीकृतं सेवितं भोजनं संस्कारविरुद्धमेव। प्रायशः जनाः तैलयुक्तं तीक्ष्णं कटुकमुष्णञ्च भोजनं कृत्वा तदनन्तरमेव शीतलपेयान्युपयुञ्जन्ति एतद्वीर्यतः विरुद्धम्, यथा-**

**विरुद्धं वीर्यतो ज्ञेयं वीर्यतः शीतलात्मकम् ॥93॥**
**तत् संयोज्योष्णवीर्येण द्रव्येण सह सेव्यते ॥94॥**
**(च.सू.26/93-94)।**

वर्तमान समय में भोजन बनाने की प्रक्रिया और उसके उपभोग की विधि में भी अनेक दोष दिखाई देते हैं। शीतकरण यन्त्रों (फ्रिज) में लम्बे समय तक रखा हुआ भोजन और फिर उसे दोबारा गर्म करके सेवन किया गया भोजन संस्कार-विरुद्ध ही है। सामान्यतः लोग तैलयुक्त, तीक्ष्ण, कटु और उष्ण भोजन करने के तत्काल बाद शीतल पेयों का सेवन करते हैं-यह वीर्य के अनुसार विरुद्ध होता है। जैसा कि कहा गया है-

'वीर्य के अनुसार जो वस्तु शीतल-स्वभाव वाली हो,उसे उष्ण-वीर्य वाले द्रव्य के साथ संयोग कर सेवन करना विरुद्ध है।' (चरकसंहिता, सूत्रस्थान 26/93-94)

**पिज्जा-बर्गरादिकं गुरु रूक्षं संयोगविरुद्धात्मकं देशविरुद्धात्मकञ्च भोजनं वर्तमानकाले विशेषेण कुर्वन्ति जनाः तदपि हानिकारकमेव। यद्यपि विरुद्धात्मिका ह्येषा क्रिया परस्परगुणविरुद्ध-संयोगविरुद्ध- संस्कारविरुद्ध-देशविरुद्ध-कालविरुद्ध-मात्राविरुद्ध-स्वभावविरुद्धादिरूपेण बहुविधा वर्तते, विस्तरेण च तत्र वर्णनस्यावश्यकतापि वर्ततेऽत एव पृथक् लेखमेकं लिखिष्यामि। अत्र त्वेतदेव कथनं पर्याप्तं यत् सम्यक् प्रविचार्यास्य परिपालना कर्तव्या।**

पिज्जा, बर्गर आदि गुरु, रूक्ष, संयोग-विरुद्ध तथा देश-विरुद्ध प्रकार का भोजन लोग वर्तमान समय में विशेष रूप से करते हैं-यह भी निश्चय ही हानिकारक है। यद्यपि यह विरुद्धात्मक क्रिया परस्पर-गुण-विरुद्ध, संयोग-विरुद्ध, संस्कार-विरुद्ध, देश-विरुद्ध, काल-विरुद्ध, मात्रा-विरुद्ध, स्वभाव-विरुद्ध आदि रूपों में अनेक प्रकार से पाई जाती है, और इसके विस्तृत वर्णन की भी आवश्यकता है; इसलिए मैं इस पर पृथक् से एक लेख लिखूँगा। यहाँ इतना कहना ही पर्याप्त है कि इसका सम्यक् विचार कर इसकी सावधानीपूर्वक पालना करनी चाहिए।

**विरुद्धाहारस्य कदाचिद्वितथता-**

**विरुद्धाहारस्य कदाचिद्वितथतापि भवति, यथा-**

**सात्म्यतोऽल्पतया वाऽपि दीप्ताग्नेस्तरुणस्य च।**
**स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत्।।**
**( चरक. सूत्र. 26 /106 )**

**एषा वितथता नूनं श्रेष्ठबलस्य श्रेष्ठाग्नेश्च प्रभावेणैव भवति। किन्तु यदा-कदैव विरुद्धाहारस्य सेवनं विद्यमानेन शरीरस्य श्रेष्ठबलेनोद्दीप्तेन च जठराग्निना वितथं ( व्यर्थं, निष्प्रभावं ) क्रियते,तत्तु दोषप्रकोपकञ्चापि न भवति।यदि चेत्तस्यैव विरुद्धाहारस्य सेवनं सततमभ्यास-पूर्वकं ( निरन्तरं, बारं बारं ) करोति कोऽपि जनस्तदा तु स विरुद्धाहारः हानिकारको भवत्येव।**

विरुद्धाहार की कभी-कभी निष्प्रभावता-

विरुद्धाहार कभी-कभी निष्प्रभावी भी हो जाता है, जैसे-

'सात्म्य (स्वाभाविक अनुकूलता) के कारण, या अल्प मात्रा में होने पर, अथवा दीप्त जठराग्नि वाले, तरुण (युवा), स्निग्ध, व्यायामशील और बलवान् व्यक्तियों में विरुद्धाहार निष्प्रभावी हो जाता है।' (चरक संहिता, सूत्रस्थान 26/106)

यह निष्प्रभावता निःसंदेह श्रेष्ठ बल और श्रेष्ठ अग्नि के प्रभाव से ही होती है। लेकिन कभी-कभार विरुद्धाहार का सेवन यदि शरीर के विद्यमान श्रेष्ठ बल और उत्तेजित जठराग्नि के कारण निष्प्रभावी हो भी जाए, तो भी वह दोषों को न बढ़ाता है न विकृति उत्पन्न करता है। परन्तु यदि यही विरुद्धाहार निरन्तर, बार-बार, अभ्यासपूर्वक किसी व्यक्ति द्वारा सेवन किया जाए, तब वह विरुद्धाहार निश्चित रूप से हानिकारक हो जाता है।

**निर्दिशत्याचार्यश्चरकः प्रसङ्गेऽस्मिन् यत् -**

**रसदोषसन्निपाते तु ये रसा यैर्दोषैः समानगुणाः समानगुणभूयिष्ठा वा भवन्ति ते तानभिवर्धयन्ति, विपरीतगुणा विपरीतगुणभूयिष्ठा वा शमयन्त्यभ्यस्यमाना इति।( चरक. विमान.1/7 )**

**स्पष्टयति चात्र व्याख्याकारश्चक्रपाणिः-**

**सन्निपाते इति अन्तः शरीरमेलके। तु शब्दो विशेषे, तेन विपरीतगुणा एव विशेषेण विपरीतगुणभूयिष्ठापेक्षया शमयन्तीति दर्शयति। रसानां तु यथा उपचाराद्गुणा भवन्ति तदभिहितं 'गुणा-गुणाश्रया नोक्ताः'( च.सू.26 ) इत्यादिना सूत्रे। अभ्यस्यमाना इति न सकृदुपयुज्यमानाः।**

आचार्य चरक इस प्रसङ्ग में निर्देश करते हैं कि-

'रस और दोषों के संयोग (एक साथ मिलने) की अवस्था में वे रस, जिनके गुण उन दोषों के समान होते हैं अथवा जिनमें समान गुणों की अधिकता होती है, वे उन दोषों को बढ़ाते हैं। और जिन रसों के गुण विपरीत होते हैं अथवा जिनमें विपरीत गुणों की अधिकता होती है, वे दोषों को शमन करते हैं-जब उनका अभ्यास किया जाता है।' (च.वि.1/7)

इस पर चक्रपाणि व्याख्या करते हुए स्पष्ट करते हैं–

'सन्निपात' का अर्थ है शरीर के भीतर रस–दोषों का मेल। 'तु' शब्द विशेषार्थक है, जिससे यह स्पष्ट होता है कि विपरीत गुण वाले रस विशेष रूप से–उन रसों की अपेक्षा जिनमें विपरीत गुणों की अधिकता हो–दोषों का शमन करते हैं। रसों के गुण उपचार के अनुसार कैसे हो जाते हैं, यह सूत्र 'गुणागुणाश्रया नोक्ता:' (च.सू.26) आदि में कहा गया है। 'अभ्यस्यमाना' का अर्थ है–जो एक बार नहीं, अपितु बार–बार सेवन किए जाएँ।

**अत एव सतताभ्यासेन तु शनैः शनैः दीप्ताग्नेस्तरुणस्य तथा स्निग्धव्यायामबलिनामपि सेवितो विरुद्धाहारो हानिं करोत्येव, विरुद्धस्य वितथता तु सकृदुपयुज्यमान एव तथा यदा कदोपसेवन एव सीमिता वर्तते, सतताभ्यस्यमाने जने तु विरुद्धाहारः दोषप्रकोपकः विविध-रोगोपजनकश्च भवत्येव, यथा हि-**

**षाण्ढ्यान्ध्यवीसर्पदकोदराणां विस्फोटकोन्माद-भगन्दराणाम्।**

**मूर्च्छामदाध्मानगलग्रहाणां पाण्डवामयस्या-मविषस्य चैव।।102।।**

**किलासकुष्ठग्रहणीगदानां शोथाम्लपित्त-ज्वरपीनसानाम्।**

**सन्तानदोषस्य तथैव मृत्योर्विरुद्धमन्नं प्रवदन्ति हेतुम्।।103।।( च.सू.26/102–103 )**

इसी कारण, सतत अभ्यास (निरन्तर सेवन) से धीरे–धीरे–दीप्त अग्नि वाले, तरुण (युवा), तथा स्निग्ध, व्यायामशील और बलवान् व्यक्तियों में भी–सेवित किया गया विरुद्धाहार अन्ततः हानि ही करता है। विरुद्धाहार की निष्प्रभावता केवल तब तक ही रहती है जब वह एक बार या कभी–कभी ही सेवन किया जाता है। परन्तु जब कोई व्यक्ति विरुद्धाहार का निरन्तर, बार–बार सेवन करता है, तब वह विरुद्धाहार निश्चित रूप से दोषों को बढ़ाने वाला और विविध रोगों को उत्पन्न करने वाला हो जाता है, जैसे–

नपुंसकता, अन्धत्व, विसर्प, उदररोग, फोड़े-फुंसियाँ, उन्माद, भगन्दर, मूर्च्छा, मद, आध्मान (उदरफूलना), गले का रुक जाना, पाण्डुरोग, आमविष,किलास, कुष्ठ, ग्रहणीदोष, शोथ, अम्लपित्त, ज्वर, पीनस,सन्तानदोष तथा मृत्यु–इन सबके हेतु (कारण) को विरुद्धाहार ही कहा गया है।( च.सू.26/102–103 )

**वर्तमानकाले ह्याध्मानगलग्रहपाण्ड्वामयाम-विषकिलासकुष्ठग्रहणीगदाम्लपित्तादिभिः जनाः विशेषेण पीडिताः भवन्ति तत्र तु विरुरुद्धाहारस्य हेतुताऽप्यनुसन्धेया वर्तते चिकित्सकैः। अत्राचार्यस्य प्रमुखोद्देश्यस्त्वेष एवास्ति यत् कस्यापि भेषजद्रव्यस्याहारद्रव्यस्य वा सतताभ्यासं करोति कोऽपि जनस्तदा तद्द्रव्यं शरीरोपरि स्वस्य प्रभावं प्रकटयति। एष एव नियमः विरुद्धाहारसेवनेऽप्येवमेव प्रभावं प्रदर्शयति। यथोपरि निर्दिष्टं यत् कतिपय-विशिष्टासु परिस्थितिषु विरुद्धाहारसेवनमपि शरीरे यथेष्टां हानिं न करोति। तस्य कारणं त्वेतदेवास्ति यत् शरीरमेव विरुद्धाहारप्रभावं निराकर्तुं समर्थमस्ति। किन्तु विरुद्धाहारस्य सतताभ्यासेन तु शरीरस्थस्य व्याधिक्षमतायाः ह्रासो भवत्येव।**

वर्तमान समय में लोग आध्मान, गले में जकडाहट, पाण्डुरोग, आमविष, किलास, कुष्ठ, ग्रहणीदोष, अम्लपित्त आदि रोगों से विशेष रूप से पीड़ित होते हैं। वहाँ चिकित्सकों को अवश्य ही विरुद्धाहार को

भी एक कारण के रूप में विचार करना चाहिए। यहाँ आचार्य का मुख्य उद्देश्य यही है कि जब कोई व्यक्ति किसी औषधि-द्रव्य या आहार-द्रव्य का निरन्तर सेवन करता है, तब वह द्रव्य अपने प्रभाव को शरीर पर अवश्य प्रकट करता है। यही नियम विरुद्धाहार के सेवन में भी समान प्रकार का प्रभाव दिखाता है। जैसा ऊपर कहा गया है कि कुछ विशिष्ट परिस्थितियों में विरुद्धाहार का सेवन शरीर को अपेक्षित हानि नहीं पहुँचाता। इसका कारण यही है कि शरीर स्वयं विरुद्धाहार के प्रभाव को नष्ट करने में सक्षम होता है। परन्तुविरुद्धाहार के निरन्तर अभ्यास से शरीर की रोग-प्रतिरोधक क्षमता में अवश्य ही कमी आ जाती है।

**यथा हि प्रोक्तं चरके-**

**तदेव ह्यपथ्यं देशकालसंयोगवीर्यप्रमाणातियोगाद्भूयस्तरमपथ्यं सम्पद्यते।**

**स एव दोषः संसृष्टयोनिर्विरुद्धोपक्रमो गम्भीरानुगतश्चिरस्थितः प्राणायतनसमुत्थो मर्मोपघाती कष्टतमः क्षिप्रकारितमश्च सम्पद्यते।**

**शरीराणि चातिस्थूलान्यतिकृशान्यनिविष्टमांस-शोणितास्थीनि दुर्बलान्यसात्म्याहारोपचितान्यल्पाहाराण्यल्पसत्त्वानि च भवन्त्यव्याधिसहानि, विपरीतानि पुनर्व्याधिसहानि।**

**एभ्यश्चैवापथ्याहारदोषशरीरविशेषेभ्यो व्याधयो मृदवो दारुणाः क्षिप्रसमुत्थाश्चिरकारिणश्च भवन्ति।**

**त एव वातपित्तश्लेष्माणः स्थानविशेषे प्रकुपिता व्याधिविशेषानभिनिर्वर्तयन्त्यग्निवेश!।। ( च.सू. 28/7 )**

**अत एव विरुद्धात्मकमपथ्यसेवनं परिवर्जनीयम्। यतो हि 'दोषधातुप्रदूषको हि विरुद्धाहारः'।**

जैसा कि चरक में कहा गया है-

वही अपथ्य (अनुचित आहार) देश, काल, संयोजन, वीर्य (शक्ति), मात्रा और अति-उपयोग के कारण और भी अधिक अपथ्य बन जाता है।

वही दोष, जब संमिश्र (मिश्रित कारणों वाला), अनुपयुक्त रूप से उपचारित, शरीर के भीतर गहराई तक प्रविष्ट, दीर्घकाल तक स्थित, प्राणायतनों से उत्पन्न तथा मर्मों को क्षति पहुँचाने वाला होता है, तब अत्यन्त कष्टदायक और शीघ्र आक्रमण करने वाला बन जाता है।

और शरीर भी-अत्यधिक स्थूल, अत्यधिक कृश, असामंजस्यपूर्ण मांस-रक्त-अस्थि से युक्त, दुर्बल, असात्म्य आहार से उत्पन्न, अल्पाहारी तथा अल्प साहस (अल्प सत्त्व) वाले-रोगों को सहन करने में असमर्थ होते हैं; इसके विपरीत शरीर रोग-सहिष्णु होते हैं।और इन्हीं अपथ्य-आहार, दोष और शरीर की इन विशिष्ट अवस्थाओं से उत्पन्न रोग-कभी मृदु, कभी कठोर, कभी शीघ्र उत्पन्न होने वाले और कभी दीर्घकाल तक बने रहने वाले हो जाते हैं।हे अग्निवेश! यही वात, पित्त और कफ, जब किसी विशेष स्थान में प्रकुपित होते हैं, तो विशेष प्रकार के रोग उत्पन्न करते हैं।

अतः विरुद्ध स्वभाव वाले अपथ्य आहार का सेवन परित्याज्य है। क्योंकि- 'विरुद्धाहार दोष-धातुओं को दूषित करने वाला है।

आदर्शयोजनाविभागः
**संस्कृतसंवर्धनयोजना**
( शिक्षामन्त्रालयः, भारतसर्वकारस्य केन्द्रीययोजना )
संचालकः
**केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली**
संसदः अधिनियमेन स्थापितः
५६-५७, सांस्थानिकक्षेत्रम्, जनकपुरी, देहली ११००५८

विज्ञापनसंख्या- ०२/२५ दिनाङ्कः-
२०/११/२०२५

**संस्कृतसंवर्धनस्य केन्द्रीययोजनायाम् अनुमतविभिन्नेषु आदर्शसंस्कृतमहाविद्यालयेषु ASMs)/ आदर्शसंस्कृतशोधसंस्थानेषु (ASSSs) शैक्षणिकपदेषु / अन्यशैक्षिकपदेषु साक्षात् नियुक्त्यर्थं रिक्तानां पदानां सूचना**

केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली(CSU) संस्कृतस्य संवर्धनाय भारतसर्वकारस्य केन्द्रीययोजनानां कार्यान्वयनाय शिक्षामन्त्रालयस्य, भारतसर्वकारस्य नोडल-एजेंसी (अभिकरणरूपेण) वर्तते। केन्द्रीययोजनासु अन्यतमायाः अर्थात् "आदर्शसंस्कृतमहाविद्यालयरूपेण (ASMs)/आदर्शसंस्कृतशोधसंस्थानरूपेण (ASSSs) प्राप्तमान्यतानां संस्थानानां वित्तीयसहायतायोजनायाः (संशोधितादर्शयोजना-२०२२)" इत्यस्याः अन्तर्गततया देशस्य विभिन्नभागेषु वित्तीयसहायतायै विभिन्नानि संस्थानानि ASMs/ASSSs इतिरूपेण मान्यताप्राप्तानि सन्ति। अस्मिन् सन्दर्भे, उक्तयोजनायां निहितप्रावधानानुसारेण, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली, एतेषाम् अनुदानग्राहिणाम् आदर्शसंस्थानानां पक्षतः उपर्युक्तयोजनान्तर्गतमान्यताप्राप्तेषु विभिन्नेषु ASMs/ASSSs संस्थानेषु अधोलिखितेषु शैक्षणिकेषु / अन्यशैक्षिकपदेषु साक्षात् नियुक्त्यर्थं भारतीयजनेभ्यः ऑनलाइन आवेदनम् आमन्त्रयति। रिक्तानां शैक्षणिकानां/ अन्यशैक्षिकपदानां संख्यायाः आरक्षणस्य च विवरणम् अधोलिखितं वर्तते-

| क्र. सं. | पदम् | विषयः | रिक्तीनां संख्या आरक्षणस्य विवरणं च * | |
|---|---|---|---|---|
| 1. | **सहायकाचार्यः** (शैक्षणिकस्तरः-10 (₹57,700-1,82,400)) | व्याकरणम्, दर्शनम्, साहित्यम्, पुराणेतिहासः ज्योतिषम्, बौद्धदर्शनम्, धर्मशास्त्रम्, वेद-पौरोहित्यम् एवं कर्मकाण्डः, न्यायः, वेदान्तः इत्येतेषु पारम्परिकसंस्कृतविषयेषु, आङ्ग्लम्, हिन्दी, तमिल, मणिपुरी इत्येतेषु आधुनिकविषयेषु, तथा अनुसन्धानम् (दर्शनम्/संस्कृतम्, पाण्डुलिपिविज्ञानम्, सम्पादनम् एवं प्रकाशनम्) एवं ग्रन्थालयविज्ञानम् | अनारक्षितम् -27, अनु. जातिः -09, अनु. जनजातिः -01, अन्यपिछडावर्गः -15, आर्थिकरूपेण दुर्बलवर्गः -07 | दिव्याङ्गव्यक्तिः -04 |
| 2. | **कनिष्ठ लाइब्रेरियन** (शैक्षणिकस्तरः- 10 (₹57,700-1,82,400)) | | | |
| | | आहत्य पदानि | 59* | |

➢ ऑनलाइन पञ्जीकरणम्/आवेदनं च कर्तुं प्रारम्भतिथिः 20.11.2025 (गुरुवासरः) ।
➢ ऑनलाइन पञ्जीकरणम्/ आवेदनं च कर्तुं अन्तिमतिथिः 20.12.2025 (शनिवासरः) रात्रि 11.30 वादनपर्यन्तम् (IST) [ इतः परं लिंक निष्क्रियं भविष्यति]।
➢ हार्ड कॉपी प्राप्त्यर्थम् अन्तिमतिथिः 29.12.2025 (सोमवासरः) ।

* **अनु. जातिः** – अनुसूचितजातिः (Scheduled Caste), **अनु. जनजातिः** – अनुसूचितजनजातिः (Scheduled Tribe), **अन्यपिछडावर्गः** – अन्य पिछड़ा वर्ग (क्रीमी लेयर भिन्न) (Other Backward Classes - Non-creamy layer), **दिव्यांग व्यक्ति** – बेंचमार्क दिव्यांग व्यक्ति (Persons with Benchmark Disability), **आर्थिकरूपेण दुर्बलवर्गः** – (Economically Weaker Section), **अनारक्षितम्** (Unreserved) ।

**टिप्पणी** १- उपर्युक्तरिक्तयः ASMs/ASSSs संस्थाभिः प्राप्तसूचनानुसारं वर्तन्ते, किन्तु एताः भारते स्थितानां १६ ASMs/ASSSs संस्थानानां संयुक्तरिक्तयः सन्ति। विषयानुसारं संस्थानानुसारं च रिक्तीनां विवरणं तथा आवेदनपत्रपूरणप्रक्रियादिकम् अस्य विश्वविद्यालयस्य वेबसाइटमध्ये www.sanskrit.nic.in इत्यत्र "Recruitment/Notification" (नियुक्तिः /सूचना) इति शीर्षकान्तर्गततया उपलब्धे विस्तृतविज्ञापने द्रष्टुं शक्यते। इदं विज्ञापनं सम्बद्धानाम् १६ ASMs/ASSSs इत्येतेषां संस्थानानां वेबसाइटमध्येऽपि द्रष्टुं शक्यते। आवेदकाः अनिवार्यरूपेण www.sanskrit.nic.in इति वेबसाइटमाध्यमेनैव ऑनलाइन आवेदनं कुर्युः। इदं विज्ञापनं संक्षिप्तसूचनामात्रं वर्तते। इच्छुकान् आवेदकान् प्रति विशेषेण आग्रहो वर्तते, यत् आवेदनपत्रपूरणात् प्रागेव सम्बद्धान्तर्जालपृष्ठे (वेबसाइट) प्रति गत्वा विस्तृतं विज्ञापनम् अवश्यम् अवलोकयन्तु। परीक्षायाः साक्षात्कारस्य च दिनाङ्कविषये सूचना निर्धारितकाले केवलं www.sanskrit.nic.in इत्यनेनैव प्रकाश्यते। एतदतिरिक्ततया आवेदकान् प्रति अयं परामर्शः वर्तते यत् ते नवीनतमसूचनाप्राप्त्यर्थं विश्वविद्यालयस्य अन्तर्जालपृष्ठम् (वेबसाइट) नियमिततया पश्येयुः।

**टिप्पणी** २- एतेषां पदानां नियुक्त्यधिकारः (Appointing Authority) केवलं सम्बन्धितानाम् आदर्शसंस्थानानामेव वर्तते, एवं नियोक्ताः (Employer) अपि एताः एव संस्थाः भवन्ति। सर्वे आवेदकाः इदं ध्यातव्यं यत् योजनान्तर्गतवित्तीयसहायताप्राप्तेषु ASMs/ASSSs संस्थानेषु शैक्षणिकेषु शैक्षणिकेतरेषु च पदेषु नियुक्ताः जनाः तत्तत् ASMs/ASSSs संस्थानानामेव कर्मचारी भविष्यति, न तु भारतसर्वकारस्य/ केन्द्रीयसंस्कृतविश्वविद्यालयस्य वा। विश्वविद्यालयस्य उत्तरदायित्वं (Liability) तावत् ASMs/ASSSs संस्थानानाम् अनुदान/वित्तीयसहायताप्रदानं तथा संशोधितादर्शयोजना, २०२२ इत्यत्र निर्धारितविषयेषु प्रशासनिकनियन्त्रणपर्यन्तमेव सीमितमस्ति।

हस्ता/
कुलसचिवः
(प्र.)



श्री नरेन्द्र मोदी
माननीय प्रधानमंत्री

स्वदेशी अपनाएं
आत्मनिर्भर राजस्थान बनाएं



श्री भजनलाल शर्मा
माननीय मुख्यमंत्री

माननीय प्रधानमंत्री **श्री नरेन्द्र मोदी जी** के **75 वें जन्मदिन** से प्रेरित जनसेवा अभियान


# सेवा शिविरों से मिली आम जनता को बड़ी राहत

| | | |
|---|---|---|
| **2.03 लाख +** पट्टे वितरण | **1.22 लाख +** फार्मर रजिस्ट्री में नए पंजीयन | **1.61 लाख+** भू-राजस्व शुद्धिकरण प्रकरणों का निस्तारण |
| **1.30 लाख +** नामान्तरण प्रकरणों का निस्तारण | **2.76 लाख +** मंगला पशु बीमा योजना पॉलिसी | **1.78 लाख +** मूल निवास प्रमाण पत्र |
| **2.11 लाख +** जाति प्रमाण पत्र वितरण | **1.25 लाख +** जन्म, मृत्यु एवं विवाह पंजीयन | **2.03 लाख+** सामाजिक सुरक्षा पेंशनर्स सत्यापन |
| **97 हजार +** खाद्य सुरक्षा पोर्टल पर आवेदनों की स्वीकृति | **25 हजार +** स्वनिधि योजनांतर्गत ऋण आवेदन | **1.62 लाख +** जनधन योजना में बैंक खाते खोले |
| **1.19 लाख +** जन आधार योजना में अद्यतन / संशोधन | **75 हजार +** वय वंदन कार्ड जारी | **17.06 लाख +** किशोरियों एवं गर्भवती महिलाओं की एनीमिया की जांच |
| **11.42 लाख +** नागरिकों की टी.बी. रोग स्क्रीनिंग | **25.68 लाख +** लोगों का स्वास्थ्य शिविर में उपचार | **1.42 लाख +** नई स्ट्रीट लाइट / सुधार |

सूचना एवं जनसम्पर्क विभाग, राजस्थान

प्रेषण-प्रत्येक माह की ५ तारीख आर.एम.एस. ( पी.एस.ओ. ) जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2024-26



'भारती' संस्कृत-पत्रिकायाः **'कौस्तुभजयन्ती'** विशेषाङ्कस्य **लोकार्पणं** कुर्वन्तो राष्ट्रीयस्वयंसेवकसंघस्य सरसंघचालकाः श्रीमन्तो **मोहनराव भागवत**-महोदयाः, पार्श्वस्थाः राजस्थानस्य क्षेत्रप्रचारकः श्री **निम्बारामः**, राजस्थानक्षेत्रस्य माननीयः संघचालको डॉ. **रमेशचन्द्र** अग्रवालः, 'भारती' संस्कृत-पत्रिकायाः प्रबन्धसम्पादकः श्री **सुदामा** शर्मा चेति।




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः प्रोफेसर बनवारीलालगौड़ः, प्रकाशको मुद्रकश्च राम स्वरूप अग्रवाल द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७१०१४

प्रतिष्ठायाम्,